CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 174

Title Tarkabhi Bhasya

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 174 Subject: Vedanta.

Title: Triśati Bhasya

Author: Śankara Scribe: —

Date of the work: — Date of the Ms.: Saka 1713

Place of the work: — Place of the Ms.: —

Size: 13" by 4.1" Extent: 42 Foll.

Language: Sanskrit Script: Devanagari

Remarks: Complete.

श्रीगणेशायनमः वंदेविघ्नेश्वरंदेवंसर्वसिद्धिप्रदायिनं वामांकारूढवामाक्षीकरपल्लवपूजितं १ पाशांकुशेक्षुसुमरंजितपंचशाखापाटल्यशालिसुषुमांचित
गात्रवल्लीं प्राचीनवाकृस्तुतिपदांपरदेवतांतांपंचायुधार्चितपदांप्रणमामिदेवीं २ लोपामुद्रापतिनत्वाहयग्रीवमपीश्वरं श्रीविद्याराजसंसिद्धिकारीपंकजवीक्ष
णं ३ विस्तारितांबहुविधांबहुभिः कृतांचटीकांविलोकयतु मक्षमतांजनानां तत्रत्यसर्वपदयोगविवेकभानुतुष्ट्यैकरोमिललितापदभक्तियोगात् ४ बहुकाल
सभक्तिमहिम्नागुरुपादांवबलंब्यस्थितायकुंभयोनिमुनयेशिवदंपती कृतनामशतत्रयोकोप्रेरितहयग्रीवउवाच ककाररूपेति ककारः कवर्णः स्वरूपज्ञापकविशेष
णयस्याः साकादिविद्याविग्रहेत्यर्थः अथवा तद्वाचकतयाककारः रूपंवाचकंयस्यांतेककाररूपाः हिरण्यगर्भः उदकंउत्तमांगसुखादींश्चहिरण्यगर्भेणनिष्ठजग
दाधारकत्वजगत्कर्तृत्वादिगुणवत्वं ककारस्यव्यंजनादिमत्वेवर्णत्वेनवर्ततइतिततद्वाच्यतया तथाहिरण्यगर्भःसमवर्तताग्रे उदकनिष्ठात्रादिद्वाराजगत्संजीवनहे
तुत्वमपि ककारस्यविद्याग्रिमवर्णतयास्तीति तद्रूपावा अपोवाइदं सर्वंविश्वमित्यत्रापदेतिश्रुतेः सर्वेषांप्राणिनांशिरस्यमृतमस्तियोगमार्गेण कुंडलीगमनेतत्र
त्यतत्त्ववाहाप्लुतेनयोगीनामीश्वरसाम्यंजायतइतियोगशास्त्रेषुप्रसिद्धं तद्वत्कवर्णः मंत्रादिमभागस्थः तत्पुरश्चर्यापरायणानांशिवभावमेवयच्छतीतिवातद्रूपे
त्यर्थः कंब्रह्मखंब्रह्मेतिश्रुतेः दहराकाशस्यसुखरूपत्वेनपरमप्रेमास्पदतयाभिलाषाविषयत्ववत् ककाराख्यतिप्रीतिविषयमूलमंत्रादिमाक्षरतयाभ्यर्हित
त्वाद्वातद्रूपेत्यर्थः ॐ ककाररूपायैनमः १ कल्याणीकल्याणानिसुखानियुवसार्वभौमानंदादारभ्यब्रह्मानंदपर्यंतंतैत्तिरीयकादौप्रतिपादितानिततदुपाधिभि १

देछ्वविछिन्नतयातानिकल्याणशब्दवाच्यानिएतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीतिश्रुतेः समष्टि वेष्टित्वमुपहितस्वरूपेणसंभवतीतिमतुश्समासोपप
त्तिः तथाचराहोः शिरइतिवत्समासांतर्गतषष्ठ्यस्यभेदस्याविवक्षितयानंदैकविग्रहवतीत्यर्थः विज्ञानमानंदब्रह्मेतिश्रुत्युक्तलक्षणेत्यर्थः ॐ कल्याण्यैनमः
कल्याणगुणशालिनी कल्याणाः सुखकर्त्तारः येगुणाः सत्यकामसत्यसंकल्पत्वसर्वाधिपत्यसर्वेशानत्ववामनीत्वभामनीत्वादयः तेअस्याः शाल्यंतेइतितथाएमो
शोभयंतीतिवोतेः शाल्यंतइतिवाकल्याणगुणशालिनीतथाचकल्याणाश्चतेगुणाश्चकल्याणगुणाः शाल्यंत्येनामितिकल्याणगुणशालिनीअस्मिन्समासेदेव
तायाः पराधीनगुणवत्वंस्वतः शुद्धचैतन्यत्वंचस्फुरीतंकल्याणगुणैः शाल्यतइत्यत्रतुगुणवत्वमात्रंदेवतायाः द्योत्यतेतस्योपाधिकंत्वंवैदिकमपिस्तुतौतदप्रकरणे
नदोषायग्रदिगुणानामारोपितत्वेनतत्संकीर्तनस्यभेदबुद्धिसमयेतत्कृपाप्राप्तिहेतुत्वेनावश्यकत्वंतथापितदपवादपुरः सरंशुद्धचैतन्याज्ञानेध्यानरूपमुख्यभज
नंमुख्यमेवेतिसंपादयितुंस्वगुरूपदिष्टमार्गेणसुकरमेवेतिनातिविस्तार्यते ॐ कल्याणगुणशालिन्यैनमः ३ कल्याणशैलनीलयाशिलानांविकारःशैलः शिला
घणइत्यर्थः कल्याणंसुखमेवशैलः घनीभूतमित्यर्थः तस्मिन्कल्याणशैलेस्वरूपेजानंदैवनेनिलयनिस्वर्यंतिष्ठतीतिः कल्याणशैलनीलयाः सभगर्कक्वास्मि
न्प्रतिष्ठितइति स्वेमहिम्नीतिछांदोग्येवचितिश्रुतेः देवदत्तस्वस्मिन्नेववर्ततइतिलौकिकप्रयोगाच्चदेवतायाः स्वस्वरूपेस्वावस्थानंयुज्यतइति कल्याणमेवशैलव

घनीभूतः कल्याणशैलः आनंदमयः कोशः कल्याणशैलः नीलयं यस्यास्तेति बहुव्रीहिसमासेनरोधिः ब्रह्मपुच्छंप्रतिष्ठेतिउक्तश्रुतिप्रामाण्यवत् अथवा कल्याण
शैलः महामेरुः निलयंगृहंयस्याः सातथासुमेरुमध्यशृंगमध्यस्थेत्यर्थः ॐकल्याणशैलनिलयायैनमः ४ कमनीयापरमानंदस्वरूपत्वेनपरमप्रेमास्पदा को
ह्येवान्यात्कः प्राण्यात् यदेषआकाशआनंदोनस्यात् इतिश्रुतेः सुखस्यमनोहरत्वेनसर्वेषांविषयत्ववत् मायावृतानांसुखप्रापकत्वेनस्वस्वेष्टदेवतासुप्रीत्यतिशयेन
तत्पूजादौप्रवर्त्ततांतत्फलदानेनमनोहरत्वाद्वाकमनीयांज्ञानिनांआनंदघनीभावात्मसुंदरमूर्त्तिमत्तथावाकमनीया ॐकमनीयायैनमः ५ कलावतीकलाशिरः
पाण्याद्यवयवाः चतुःषष्टीकलाः विद्यारूपावाभक्तध्यानायअस्तीतिकलावती ॐकलावत्यैनमः ६ कमलाक्षीमकरंदइवअक्षिणीयस्याः सातथाकमला
याः लक्ष्म्याः अक्षिशब्देनलक्षणतन्निमितकज्ञानंलक्ष्यतेविषयतासंबंधेनतद्वतीतिवाकमलायाः ऐहिकामुष्मिकश्रियः हेतुभूतेअक्षिणीअस्यास्तइति स्वकीय
वीक्षणमात्रेणमहदैश्वर्यप्रापिकेतिभावः ॐकमलाक्ष्यैनमः ७ कल्मषघ्नीकल्मषाणिपापानिहंतीनाशयतीतिकल्मषघ्नी अहंत्वासर्वपापेभ्योमोक्षयिष्या
मीतिभगवद्वचनात् अथवावेदांतमहावाक्यजन्यसाक्षात्काररूपब्रह्मविद्यावा ज्ञानाग्निः सर्वकर्माणिभस्मसात्कुरुतेतथानसंपाप ८ श्लोकंशृणोतीतिश्रुतेः
घ्न्या ॐकल्मषघ्न्यैनमः ८ करुणामृतसागरा करुण्याकृपया आतंयदमृतंमोक्षरूपंतस्यसागररूपसागरा यथामृतसमुद्रः स्वयममृतस्वरूपः सत्रन्या

नपिलिकानमृतपायिमेघादिविमुक्तममृतेनसंजीवयतितथाब्रह्मवेदब्रह्मैवभवतिब्रह्मविदाप्नोतिपरमित्यादिश्रुत्यास्वयममृतस्वरूपासती लभतेचततः
कामान्मयैवविहितान्हितान्इतिभगवद्वचनेनततदधिकारीकृतकर्मोपासनादिफलस्यदेवताप्रायणीयस्यप्राप्तौततदधिकारिणांततत्फलंस्थिरमितिसंव्य
तइतिसागरोपमा अमृतवत्सर्वसंजीवनीकरुणाकरुणामृतंकरुणामृतस्याभिन्नाश्रयत्वात्सागरा करुणाचभक्तविषयकपरिपाल्यताबुद्धिः यद्वाकरुणया
कृपयाअमृताः शास्वतकीर्त्तिमत्वेनब्रह्मादिलोकंगताः सागराः सागरराजवंश्याः यस्यास्सातथा यद्वाकरुणयादद्द्ययाहेतुनाअमृतायप्राप्तः सागरः समुद्रो
यासाभागीरथीकरुणामृतसागरा ॐकरुणामृतसागरायैनमः ९ कदंबकानन्गनावासाकदंबनामकल्पवृक्षविशेषयुक्तंयत्काननंतत्रआवासोगृहंयस्याः
सातथा ॐकदंबकाननावासायैनमः १० कदंबकुसुमप्रियाकदंबानांकुसुमानिकदंबकुसुमानितेषुप्रियाप्रीतिमतीतियावत् यद्यपिप्रियाशब्दः प्रीतिविष
यवाचकस्तथापिअत्रकुसुमजन्यप्रीत्यभावेनतद्विषयतायः वक्तुमशक्यत्वात्तथोक्तं ॐकदंबकुसुमप्रियायैनमः ११ कंदर्पविद्याकंदर्पस्यविद्यावेतीति विद्या
तन्निष्टप्रत्यक्ब्रह्मैक्यज्ञानमित्यर्थः अथवाविद्याप्रापकत्वात् इष्टमूलमंत्रवर्णसमुदायोपिविद्येत्युच्यतेवेदवाक्येषूपनिषद्वत् तद्वाचार्यत्वात्तथादेवीकच्य
ते ॐकंदर्पविद्यायैनमः कंदर्पजनकापांगवीक्षणाः अपांगाभ्यांवीक्षणमपांगवीक्षणंईषद्दर्शनमितियावत् कंदर्पजनकंअपांगवीक्षणंयस्याः अनेननाम्नाए

त्रि॰भा॰ षांजडानामपिकुरूपिणांजनानामुपरिसकृदीषद्वीक्षणमभिजायतेकंदर्पवद्रूपयौवनसामर्थ्यलक्ष्मीभाजोभवंतीतिध्वनितं यद्वाकंदर्पस्यजनकः श्रीनारायणःसः
२ यस्याःअपांगवीक्षणेनषट्पदवल्लिवलनेवर्ततेयस्याआज्ञामावश्यतयामहाविष्णुः जगद्रक्षणादिकार्यंकरोतिसातथेति अथवाकंदर्पजनकामहालक्ष्मीःयस्याः
अपांगवीक्षणप्रेर्यतथावर्ततेतथाकंदर्पस्यमन्मथस्यजनकाः स्रक्चंदनादिभोग्यविषयाः तेयस्याः अपांगवीक्षणात्प्रभवंतिसातथाअथवाचंद्रस्यवामनेत्रतया
अपांगवीक्षणाच्चंद्रिकोच्यतेकंदर्पजनकमपांगवीक्षणंयस्याः सातथाकंदर्पजनकशब्देनलक्ष्मीनिवासकमललक्ष्यतेतद्वदपांगकामाक्षीकमलाक्षीत्यर्थः तन्निरू
पितवीक्षणंलोकसंततिवर्धनंयस्याः सातथा ॐ कंदर्पजनकापांगवीक्षणायैनमः कर्पूरवीटिसौरभ्यकल्लोलितककुत्पदायैनमः कर्पूरयुक्ताश्च्वताः विघश्च्वत्तांबूल
कवलान्वितासांसौरभ्यंसौगंध्यंतैः कल्लोलितानिअसकृत्परिमलितानिदिशातयानिप्रदेशायस्याः सामुखवासीतपरिमलेनजगन्मात्रंसुरभिकृतमितिस्वरू
पातिशयोक्तिःअस्मिन्नामानिव्यज्यतमहाराजभोगवतीत्यर्थः ॐ कर्पूरवीटिसौरभ्यकल्लोलितककुप्तटायैनमः १४ कलिदोषहराकलेःतिष्यात्जायमा
नांपुरुषाणांजन्मान्तरेणयोदोषाः पापानिजयांति तान्दृष्टाश्रुताकीर्तितासंस्तुतापूजिताध्यातासतीहरतीतितथाकलेः अन्योन्यवादिनाकलहात्तन्मताभिनिवे
शवशाज्जायमानायेदोषाः १२ब्रह्मविषयेअस्तित्वनास्तित्वदेहादिव्यतिरिक्तत्वभिन्नत्वाभिन्नत्वगुणित्वातिसाधकयुक्त्याभासतदनुगुणासंमत्याभासश्रुतिता २

ना त्सर्यविघटौन्यथाकरणदुराग्रहजन्यकामक्रोधपुरुषपरशक्तियमाणनिंदावचनादिरूपाबहुविधादोषाः तानेद्वैतब्रह्मज्ञानसाधनमुक्तिरूपेणहरतीतिकलिदो
षहरा ॐ कलिदोषहरायैनमः १५ कंजलोचनाकंयः जायंतइतिकंजानिकंजशब्देनअरविंदनीलोत्पलदलानिलक्ष्यंतेतद्वल्लोचनेयस्याः सातथाअथवाकं
जंब्रह्मांडअयपूर्वमेवस्रष्टाताशुवीर्यमवीसृजत् तदंडमभवद्धैममितिवचनात्कंजानिअनेककोटिब्रह्मांडानिलोचनयोः लोचनकृतवीक्षणेयस्याः सातथासेयं
देवतैक्षततिश्रुतेः ॐ कंजलोचनायैनमः १६ कम्रविग्रहाकंम्रः अतिमनोज्ञःगाभिर्यमाधुर्यादिबहुगुणोपेतत्वात्विग्रहोमूर्तिः यस्याः सातथाआनंदरू
पममृतंयत्विभातीतिश्रुतेः आनंदस्वरूपत्वाद्वाकम्रविग्रहाललितारूपेत्यर्थः ॐ कम्रविग्रहायैनमः १७ कर्मादिसाक्षिणीकर्मअदिर्येषांतानिकर्मादीनि
उपासनायोगश्रवनमननिदिध्यासनानितेषांसाक्षिणीअसंबंधीदृष्टिसाक्षिचेतिश्रुतेः अथवाकर्मादयः साध्यभूताः जिवनिष्ठाःतदनाश्रयतथाआत्मदर्शन
साधनानिसृज्यमानजगदुपादानभूतानियस्याःसातथा ॐ कर्मादिसाक्षिण्यैनमः १८ कारयित्रीकारयितृत्वंनामकुर्वित्यादिजाययितृत्वंजायमानका
र्यगोचरकृत्यसतिहेतुकर्मोद्बोधकत्वंरदंचलिङ्लोट्तव्यप्रत्ययानांधर्मः विधिनिष्ठभावनेत्युच्यतेतेषांशब्दात्मकतयाजडानांतथात्वासंभवात् तदधिष्ठा
नेचैतन्यरूपतयासर्ववेदायंत्रेकंभवंतीतिश्रुत्या वेदस्यात्माभेदेनस्वप्रकाशकतयार्थप्रकाशनद्वाराप्रामाण्यविधीनामपिवेदैकदेशतयाप्रेरणारूपत्वात्तदधि

षांजडानामपिकुरूपिणांजनानामुपरिसकृदीषद्वीक्षणमभिजायतेकंदर्पवद्रूपयौवनसामर्थ्यलक्ष्मीभाजोभवंतीतिध्वनितं यद्वाकंदर्पस्यजनकः श्रीनारायणःसः
यस्याःअपांगवीक्षणेउपलक्षवल्लिचलनेनवर्त्ततियस्याआज्ञामावश्यतयामहाविष्णुः जगद्रक्षणादिकार्यंकरोतिसातथेति अथवाकंदर्पजनकामहालक्ष्मीःयस्याः
अपांगवीक्षणप्रेर्यंतथावर्त्ततेतथाकंदर्पस्यमन्मथस्यजनकाः स्रक्चंदनादिभोग्यविषयाः तेयस्याः अपांगवीक्षणात्भवंतिसातथाअथवाचंद्रस्यवामनेत्रतया
अपांगवीक्षणाचंद्रिकोच्यतेकंदर्पजनकमपांगवीक्षणंयस्याः सातथाकंदर्पजनकशब्देनलक्ष्मीनिवासंकमलंलक्ष्यतेतद्वदपांगकामाक्षीकमलाक्षीत्यर्थः तन्निरू
पितवीक्षणंलोकसंततिवनंयस्याः सातथा ॐ कंदर्पजनकापांगवीक्षणायेनमः कर्पूरवीटिसौरभ्यकल्लोलितकंकुत्पयायेनमः कर्पूरयुक्ताश्चताः विघश्चत्तांबूल
कवलान्वितासांसौरभ्यंसौगंध्यंतैः कल्लोलितानिअसकृत्परिमलितानिदिशांतयानिप्रदेशायस्याः सामुखवासीतपरिमलेनजगन्मात्रंसुरभिकृतमितिस्वरू
पातिशयोक्तिःअस्मिन्नामानिप्यज्यतमहाराजभोगवतीत्यर्थः ॐ कर्पूरवीटिसौरभ्यकल्लोलितककुत्परायेनमः १४ कलिदोषहराकलेःतिष्यात्जायमा
नांपुरुषाणांजन्मान्तरेणयोदोषाः पापानिजयाति तान्दृष्टाश्रुताकीर्तितासंस्तुतापूजिताध्यातासतीहरतीतितथाकलेः अन्योन्यवादिनांकलहात्तन्मताभिनिवे
शवशाज्जायमानायेदोषाः परब्रह्मविषयेअस्तित्वनास्तित्वदेहादिव्यतिरिक्तत्वभिन्नत्वाभिन्नत्वगुणित्वातिसाधकयुक्त्याभासतदनुगुणासंमत्याभासश्रुति॥

त्सर्यविषयोन्यथाकरणदुराग्रहजन्यकामक्रोधपुरुषपरशक्तियमाणनिंदावचनादिरूपाबहुविधादोषाः तानद्वैतब्रह्मज्ञानसाधनमुक्तिरूपेणहरतीतिकलिदो
षहरा ॐ कलिदोषहरायेनमः १५ कंजलोचनाकेभ्यः जायंतइतिकंजानिकंजशब्देनअरविंदनीलोत्पलदलानिलक्ष्यंतेतद्वल्लोचनेयस्याः सातथाअथवाकं
जेब्रह्मांडअयपूर्वमवसृष्ट्वातासुवीर्यमवासृजत् तदंडमभवद्धैममितिवचनात्कंजानिअनेककोटिब्रह्मांडानिलोचनयोः लोचनकृतवीक्षणेयस्याः सातथासियं
देवतैक्षतेतिश्रुतेः ॐ कंजलोचनायेनमः १६ कम्रविग्रहाकंम्रः अतिमनोज्ञः गांभिर्यमाधुर्यादिबहुगुणोपेतत्वात्विग्रहोमूर्तिः यस्याः सातथाआनंदरू
पमस्तंयत्विभातीतिश्रुतेः आनंदस्वरूपत्वाद्वाकम्रविग्रहालालितारूपेत्यर्थः ॐ कम्रविग्रहायेनमः १७ कर्मादिसाक्षिणीकर्मजादिर्येषांतानिकर्मादीनि
उपासनायोगश्रवणमनननिदिध्यासनानितेषांसाक्षिणीअसंबंधीदृष्टिसाक्षिचेतिश्रुतेः अथवाकर्मादयः साध्यभूताः जीवनिष्ठाः तदनाश्रयतयाआत्मदर्शन
साधनानिसृज्यमानजगदुपादानभूतानियस्याः सातथा ॐ कर्मादिसाक्षिण्येनमः १८ कारयित्री कारयित्रत्वंनामकुर्वीत्यादिजाययित्त्वंजायमानका
र्यगोचरकृत्यकसतिहेतुकर्मोद्बोधकत्वंउदंचलिङ्-लोट्तव्यप्रत्ययानांधर्मः विधिनिष्ठभावनेत्युच्यतेतेषांशब्दात्मकतयाजडानांतथात्वासंभवात् तदधिष्ठा
नचैतन्यरूपतयासर्ववेदायंत्रेकंभवंतीतिश्रुत्या वेदस्यात्माभेदेनस्वप्रकाशकतयार्थप्रकाशनद्वाराप्रामाण्यंविधीनामपिवेदैकदेशातयाप्रेरणारूपत्वात्तदधि

त्रि०भा० ह्यानेचैतन्यात्मनाकारयतीत्तथा एषह्येवसाधुकर्मकारयतीतिश्रुतेः ॐ कारयित्र्यैनमः कामफलप्रदाकृतानांकर्मणांकालांतरभाविफलप्रदानेअदृष्टंकारणमिस
५ नीश्वरमीमांसकादिमतं तत्रजडानां सूक्ष्माणांअदृष्टानांचेतनधर्मकर्मफलप्रदानसामर्थ्ययोगात् कृतानांकर्मणांफलावश्यंभावेकर्माध्यक्षइतिश्रुतेः मयैवविहिता
न्हितान्इतिस्मृतेश्चपरदेवताकर्मफलप्रदा ॐ कर्मफलप्रदायैनमः २० इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीगोविंदभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगव
त्पादकृतायांत्रिशतीनामार्थप्रकाशिकायांमूलमंत्रप्रथमवर्णनामार्थप्रकाशनंप्रथमंयत्त ॐ एकाररूपेति एकारःरूपंमंत्रद्वितीयावयवत्वेनज्ञापकंयस्याःसात्त
था ॐ एकाररूपायैनमः १ एकाक्षरीएकंमुख्यमीश्वरोपाधित्वेनक्षरत्यात्मज्ञानेनविनामुक्तिर्नश्यतीत्यक्षरंकूटस्थशब्दवाच्यंमायातत्प्रतिबिंबनिष्ठसर्वज्ञ
त्वाद्विद्याध्यायकविशेषणत्वेनास्यास्तीत्येकाक्षरीएकंअक्षरः सर्वप्रकृतित्वात्परावरब्रह्मप्रतीकतयातदुपासनयातदुभयप्राप्तिसाधनत्वेनशुद्धब्रह्मस्वरूपल
क्षितालक्षकशब्दःप्रणवःअस्याअस्तीतिवा एकअखंडंचैतन्यरूपःअक्षरअविनाशीपरमेश्वरः अर्धशरीरत्वेनअस्याअस्तीतिवा एकान्यक्षराणिमायाविद्या
नित्तदुपासनाप्रतीकत्वेनअस्याःअस्तीतिवा अथपरायायातदक्षरमधिगम्यतइतिश्रुतेः अखंडाकारवृत्तिप्रतिफलनयोग्यचैतन्यतयातद्वृत्तिव्याप्तिमात्रेणाक्षरप
दलक्ष्यंचैतन्यंविषयतासंबंधेनास्याः अस्तीतिवा एकाक्षरी ॐ काक्षर्यैनमः २ चकारनिर्गुणब्रह्मणोपिसगुणब्रह्मविशेषणसद्भावसमुच्चयपरः सर्वत्रेति ४

द्रष्टव्यंसच्चिन्मयः शिवःसाक्षात्तस्यानंदमयीशिवेतिवचनेस्त्रीरूपांचिंतयेद्देवींपुंरूपामथवेश्वरींअथवानिष्कलंध्यायेत्सच्चिदानंदविग्रहामितिस्मृत्या
चत्वंस्त्रीत्वंपुमानितिश्वेताश्वतरोपनिषद्युपाधिकृतनानारूपसंभवोक्तेश्च अतएवसेयंदेवैत्तक्षेतत्यादौतत्सत्यंसआत्मेत्यंतेतिश्रुतिस्त्रिलिंगात् देवतादि
पदानांतत्सत्यमितिनपुंसकांतस्यसआत्मेतिपुल्लिंगांतशब्दस्यैकार्थत्वंश्रीभाष्यकाराः अविवक्षितोपाधिकारामतयातत्त्वंपदलक्ष्यार्थस्यैकत्वात्प्रतिपादयांचक्रुः॥
तस्मात्सर्वपदलक्ष्यार्थेअपिगुणाः वर्णितुंसंभाविष्यंतीतिहयग्रीवेणास्यांत्रिशत्यांबहवश्चकाराउपात्ताः तेनवयंसर्वेषांसर्वत्रनपार्थक्येनप्रयोजनांतरंपश्यामः ए
कानेकाक्षराकृतिः एकंईश्वरंप्रतिबिंबोपाधितयाशुद्धसत्वप्रधानमक्षरमज्ञानंअनेकानिमलिनसत्वप्रधानतयाजीवोपाधिभूतमूलान्यक्षराण्यज्ञानानिमायाचा
विद्याचस्वयमेवभवतीतिश्रुतेः एकंचअनेकानिचएकानेकानिएकानेकानिचतानिअक्षराणिचतानितथामायांतुप्रकृतिमित्यादिश्रुतेः तेषुआकृतयःप्रतिबिंबीता
निअवच्छिन्नानिचैतन्यानिवाघटस्थोदकावच्छिन्नप्रतिबिंबिताकाशवत्तद्यस्याःसातथाअथवाएकानिचप्रणवाद्यानिअनेकानिचअकारादिक्षकारांतानिअक्षराणि
वर्णाःआकृतिःस्वरूपंयस्याःसामातृकास्वरूपत्वेनवाआकारादिक्षकारांतामातृकेत्यभिधीयतेतिवचनात् अथवाएचककएकारककारौतौचइतराण्यनेकाक्ष
राणिचसर्वंमिलित्वापंचदशवर्णात्मिकामूलविद्याआकृतिःस्वरूपंयस्याःसाएकीभूताअनेकाक्षरेषुअज्ञेकाज्ञानेषुआकृतिःस्वरूपंशोधितत्वंपदार्थसामरस्या

त्मकं यस्याः सातथा ॐ एकानेकाक्षराकृतयेनमः ३ एततदित्यनिर्देश्याएततएतत्कालेयत्तापरिछेदवत् वस्तुततपरोक्षज्ञनिश्चितस्वरूपंएतच्चतच्चएततइत्य
कारः इत्थंभावः तृतीयार्थे तथाचएतत्त्वतत्त्वाभ्यामित्यर्थः एततदित्येननिर्देष्टुंनिर्वक्तुंयोग्यानिर्देश्यासानभवतीत्यनिर्देश्यालोकेसविशेषोहिपदार्थः परोक्षत्वाप
रोक्षत्वादिनाधर्मविशेषेणतु तेननिर्वक्तुंशक्यः शब्दप्रवृत्तिनिमित्तजातिगुणक्रियासंबंध्यर्थानामत्रसंबंधोनास्तिअशब्दमस्पर्शमरूपमव्ययंनिर्गुणंनिष्क्रियंनिष्क
लमित्यादिश्रुत्याताद्दृग्वस्तुत्वेनकरणेनकेनवावचनेननिर्देष्टुंशक्यंयद्वाचनभ्युदितमितिश्रुतेः अतः एतदित्तत्यनिर्देश्यावाङ्मनसातीतेत्यर्थः अथवाएततप्रत्यक्षा
दि प्रत्यक्षादिप्रमाणसिद्धंकार्यपश्चाद्भावितत्तत्परोक्षत्वादिविशिष्टंपूर्वकालसंबंधिव्यवहितंकारणमुच्यतेइतिशब्दः उभयत्रसंबंधनीयः कार्यमितिकारणमित्य
पिशुद्धचैतन्यरूपाअनिर्देश्याकार्यत्वकारणत्वघटकोपाधिविरहितत्वेनकार्यकारणभावाभावेतद्वाचकशब्दैः विषयीकर्तुमशक्यत्वात् अथवाएततअपरोक्षतया
अहमितिप्रतीयमानजीवचैतन्यंत्वंपदवाच्यार्थः तत्परोक्षतयाप्रतीयमानमीश्वरचैतन्यंतत्पदवाच्यार्थः इतिशब्दः एवकारार्थः तथाचवादिभेदसिद्धांतः अन्
दित्तसांख्यमतेप्रकृतिः जगत्कर्त्री पुरुषः जीवनानाचेतनः भोक्तानित्यईश्वरएवनास्तीतिसंगीकृतभागेव गुणीसर्वविश्वइतिश्रुतेः नित्यगुणविशिष्टात्परमेश्वराद्धि
न्नाः जीवानामुत्पत्तिविनाशवत्त्वेनानित्यत्वात्सएवभगवान्पारमार्थिकः एकइत्संगीकृतंतदुभयवादिमतसिद्धांतस्योपनिषदंतेसूत्रभाष्यकाराभ्यांनिरस्तत्वात्त

दुभयविधयानिर्देश्यापारमार्थिकसच्चिदानंदरूपतयाछंदोगम्यमतदेवताशब्दार्थस्यप्रतिपन्नादितिभावः अथवातटस्थेश्वरवादिकाणादादिसिद्धांतवद्व्यवस्थित
भेदवजीवेश्वररूपतयानिर्देश्याभेदव्यवस्थायाएवसाधितुमशक्यत्वादितिएततदित्यनिर्देश्या ॐ एततदित्यनिर्देश्यायेनमः ४ एकानंदचिदाकृतिः एकः मुख्यः मोक्ष
रूपत्वेनप्रा तः आनंदः सुखं चित् चैतन्यंप्रकाशः ज्ञानंआनंदश्चासौचिच्चआनंदचित् एकाचासौआनंदचिच्चएकानंदचित्एकानंदचित्आकृतिः रूपंयस्याः सासच्चि
दानंदरूपब्रह्मस्वरूपलक्षणवतीत्यर्थः विज्ञानमानंदंब्रह्मआनंदोब्रह्मेतिव्यजानात् दीप्तिस्वरूपप्रकाशात्मकपरमानंदस्वरूपस्यजीवन्मुक्त्यवस्थायांपरमात्मज्ञान
वत्पुरुषानुभवरूपप्रत्यक्षप्रमाणगम्यत्वमप्यस्तीतिसातथाअथवा एकेषांअनुभावकानांयोगिनामानंदसाक्षात्काररूपाआकृतिः निरावरणप्रकाशरूपायस्याः साअ
थवाआनंदः शिवश्चित्परमेश्वरः एकीभूतरहितेआनंदचिदाआकृतिर्यस्याः सातथा ॐ एकानंदचिदाकृतयेनमः ५ एवमित्यागमाबोध्यानन्दानंदशब्दस्यल
क्षत्तयानंदमयोवाच्याः तथाचैकोजालवानीशतइशानीभिरितिश्रुत्युक्तेयकत्वमपिजीसिध्यत्ति तथाचएकश्चासावानंदश्चतस्यचित्अधिष्ठानप्रकाशचैतन्यमाकृर्य
स्याः सेतिविग्रहः संभवत्तिब्रह्मपुच्छंप्रतिष्ठाइतितत्प्रकाशकचैतन्यस्यपुच्छशब्देनपरामर्शात् एवंचशक्तिप्रकाशकनित्यस्यप्रकाश्यनित्यत्वात् सत्यंज्ञानमनंतंब्र
ह्मेत्यादिब्रह्मस्वरूपलक्षणवाक्येषुवाच्यार्थप्राधान्येनविधिमुखेनैवब्रह्मप्रतिपादनेअतथ्यावृत्तिरूपनिषेधमुखेनलक्षणार्थप्राधान्येनब्रह्मस्वरूपलक्षणप्रति

पादनायोगेतत्त्वमसिवाक्येपिवैशिष्ट्यंवाक्यार्थः संभवतीतिचेन्नस्यात् एवमित्यागमाबोध्येति एवंविशिष्टतयाइतिप्रत्यक्षसिद्धत्वेनआगमैः वेदैः ज्ञापनीयानभ
वति आनंदशब्दस्यानंदमात्रावाचकस्यतत्प्रचुरेसंभावितेपिदुःखेजीवलक्षयांत्रैदोष्यापातात् पारमार्थिकभिन्नसत्ताकवस्त्वतराभावेनतत्त्वंपदवाच्यार्थनिष्ठविशे
षणद्वयस्यान्योन्यविरोधवत् तयातमःप्रकाशवद्वैशिष्ट्यायोगआखंडार्थोवाक्यार्थः संपद्यते तथाचस्वरूपलक्षणवाक्येषुवाच्यार्थस्यातोन्यदार्थमितिश्रुत्याः
मिथ्यात्वप्रतिपादनानिषेधमुखेनैव तद्व्यावृत्तस्वरूपप्रतिपादनेनलक्षणैर्वाक्यानिसमंजसानिभवतीतिभावः ॐ एवमित्यागमबोध्यायेनमः॥ ६॥ एकभ
क्तिमदर्चिता एकस्मिन् अभेदेजीवब्रह्मणोः भक्तिः भजनीयत्वबुद्धिः तत्परिजिज्ञासाएषासंतिः तेःअर्चितापूजितेत्येतदुपलक्षणं स्तुताध्यातानमस्कृतेत्येव
मादिनो यन्मनसाध्यायति तद्वाचावदतितत्कर्मणाकरोतीतिश्रुतेः मानसिकव्यापारपूर्वकार्याणिह्येतरींद्रियकर्माणिभवतीत्यभिप्रायः अथवाअस्मिन्संसार
मंडलेतत्स्वरूपपरिज्ञातारः एकेच तेषांभजनीयत्वाध्यवसायोभक्तिः तदेकप्रवणतासगुणब्रह्मविषयाष्टविधातैः एकभक्तिमद्भिःअर्चिता अंतर्यागबहिर्याग
महायागप्रकारे पूजितेत्यर्थः ॐ एकभक्तिमदर्चितायेनमः ७ एकाग्रचित्तनिध्याता: एकंस्वयंरूपंअग्रंआलंबनंविषयः विजातीयप्रत्ययतिरस्कारपूर्व
कः सजातीयवृत्तिकाभिः निरंतरव्याप्तिविषयीकृतंचैतन्यंयस्यतत् तादृशंचित्तमतः करणंयेषांते यमनियमप्राणायामप्रत्याहारधारणाध्यानसमाधी ६

नांपरिपाकीशयेपश्चात्संपद्यमानासंप्रज्ञातसमाधेः त्रिविधाभूमिकाऋतंभराप्रज्ञालोकाप्रशांतवाहिताचेतिऋतंयथाभूतंसच्चिदानंदलक्षणः ब्रह्मभरति
वृत्तिव्याप्त्याविषयीकरोतीति प्रथमा तथा आत्मवशात्तन्नयेदितिभगवद्वचनात् प्रज्ञालोकाः प्रज्ञायामखंडाकारवृत्तौनित्यनिरंतराभ्यासेनपरिपाकंनीतायांस
त्यांविषयिण्यां अवरणाभिभवंकुर्वत्यांसत्यांप्रज्ञाप्रतिष्ठेत्यादिश्रुतेः प्रज्ञायाः ब्रह्मस्वरूपायाःअलोकः अभिव्यक्तिः साक्षात्कारः यस्यांसंपद्यतेसाकारणविज्ञानं
यस्मिन्विज्ञातेसर्वमिदंविज्ञानंभवतीत्येकविज्ञानेनसर्वविज्ञानरूपं प्रारब्धवशात् तदावित्तंतेदध्यस्तं सर्वजगद्द्रष्टुमिच्छतियदितदानीचैतन्यप्रकाशेनेवप्रकाशि
तं जगत्स्वाप्नपदार्थवदशेषभासते इदंचभरद्वाजादीनामस्तीति पुराणादिप्रमाणवेद्यमस्माकं तथाचतस्यांभूमिकायां निरुद्धसामर्थ्येसदंतःकरणंसाकार
स्वस्वरूपंनिर्वासनंयदानश्यतितदाप्रशांतवाहिताभवति वहः प्रवाहः संततिर्वृत्तिधराअस्यास्तीतिवाहिवाहिनोभावः वाहिताप्रशांताचासोवाहितचप्रशांतवाहि
ताः अथवाप्रशांतः वाहोअस्यास्तीतिप्रशांतवाहिः प्रशांतवाहिनोभावः प्रशांतवाहितामनसोवृत्तिशून्यस्यब्रह्माकारतयास्थितिः अप्रज्ञातनामेतिसमाधियोगि
नंप्रियः इतिवचनात् प्रशांतमनसंह्येवयोगिनंसुखमुत्तमं उपैतिशांतिरजसंब्रह्मभूतमकल्मषमितिभगवद्वचनात् पृथिव्यप्तेजोनिलखेसमुत्थितेपंचात्मकेयोगगु
णेप्रवृत्तेनतस्यरोगोनजरानमृत्युः प्राप्तस्ययोगाग्निमयंशरीरंइतिश्रुत्यफललक्षणसाधनपरिपाकशाद्भवति तैनिध्याताध्यानस्यनिर्गतत्वाद्भेदास्फुर्त्तौध्यानवि

 ध्यानभवति ध्यातुस्वरूपेवंप्रकाशते ब्रह्मवेदब्रह्मैवभवतीतिश्रुतेः निध्याताइतिपाठेनितरांश्रवणमननाभ्यासध्यानेनसाक्षात्कृतेत्यर्थः ॐ एकाग्रचित्तनिर्ध्याता
 येनमः॥८॥ एषणारहिताहृताः एषणाइच्छासात्रिविधा एतल्लोकजयायपुत्रेषणा पितृलोकजयसाधनकर्मसंपादनायवित्तेषणा उपासनादिनाजयसाध
नः देवलोकस्तस्मिन्नेषणालोकेषणा आभिरहिताः।अनाकृष्टचित्ताः तेषांसमपुत्रेषणायाश्चवित्तेषणायाश्चवित्तैषणायाश्चलोकेषणायाश्चव्युत्थायाथभिक्षाचर्यंचरंती
तिश्रुतेः एषणारहिता परमहंसपरिव्राजका सन्यासिनः॥ तैरादरणातिशयप्रेम्णास्वरूपेणआहृताः अंगीकृताः निरंतरध्यानेनसाक्षात्कृतासतिमोक्षरूपतयाप्राप्ते
त्यर्थः ॐ एषणोहृतारहितायेनमः॥९॥ एलासुगंधिचिकुरा॰ एलावदितिदृष्टांतप्रदर्शनः सोगंध्यमात्रसन्द्भावदर्शनेनाकल्पितदिव्यपरिमळसन्द्भावहेतु॰ नतुप्राकृ
ततत्वप्रदर्शनपरं॥ब्रह्मणः स्वाधीनमायात्वात् तद्गतस्रुगंधइतिसाज्यात्यमात्रंव्यज्यते गुणमात्रादनेनसर्वस्यपदार्थातरस्यदृष्टांतीकरणात् सुगंधाएषांसंतीतिसु
गंधिनः तादृशाश्चिकुराः कुंतलाः यस्याः सातथा स्वभावसिद्धदिव्यपरिमळशालिसर्वांगसौंदर्यवतीचिकुरपदस्यउपलक्षणत्वादितिभावः ॐ एलासुगंधिचिकुरा
येनमः १० एनःकुटविनाशिनी॰ एनसांपापानांकूटसमुदायः अगामिसंचितप्रारब्धभेदेनसमष्टिरूपेणदृढतरंतत्ज्ञानेनविनान्यस्यभोगमात्रस्यतद्विनाशकत्वाव
गमात् तेषांचकल्पकोटिकाळक्रमिकभोगमानविनोपायांतरेणक्षमेप्सुनामात्मब्रह्माभेदेनज्ञानविषयतयोचेतन्यंतन्नाशयतीति तथाएवविदितपापंनक्षिप्यते॥

नाशरीरस्यप्रियाप्रियेस्पृशतइत्यादिश्रुतेः अहंतासर्वपापेभ्योमोक्षयिष्यामिति स्मृतेश्च अथवाएनांसिचतत्कारणीभूतंकूटंकपटवचनाभि धानंचतत्कारणंमायाच
नाशयतातितथा ॐ एनःकूटविनाशिन्यैनमः ११ एकभोगा॰ एकेनकामेश्वरेणसाकंभोगः भुक्तिभोगस्वस्वरूपानंदानुभवःयस्याः सातथा अथवाएकस्यअज्ञा
नतत्कार्यस्यकार्यकारणरूपेण भिन्नस्यतदधिष्ठानतया स्वसत्ताधायकत्वेनभोगः परिपालनंयस्याः साप्रपंचोत्पत्तिस्थितिनाशहेतुमायोपाधिकचैतन्यमित्यर्थः॥
एकाकीनरमतेततः पत्नीश्चपत्नीभावदितिपुरुषविधब्राह्मणवचनाद्दंपत्योरपिचिकभेदत्वावगमेनपरमार्थतः एतत्स्वरूपस्यैकचैतन्यरूपतावगमात्तदुभयभोगस्या
स्यैकभोगत्वात्तद्वतीतिवा एकभोगायेनमः १२ एकरसाह्वकः अभिन्नारसाः सामरस्यः यस्याःसातथा रस१ह्येवायंलब्ध्वानंदीभवति॰ इतिश्रुतेः अथवाएकः
नवरसेषुमुख्यःशृंगाररसःयस्याःसातथा एकस्मिन्स्वभर्तरीरसः निरतिशयप्रीति अनुरागसंज्ञायस्याःसातथा अथवाएकेनपरमेश्वरेणास्यांक्रियमाणः प्री
त्यतिशयरूपः एततविषयेकः यस्याः सातथा॰ अथवाषड्रसेषुमुख्यः मधुररसः प्रियत्वेनयस्याः सातथा॰ सत्वगुणप्रधानमायोपाधिकचैतन्यरूपत्वात् रस्याःस्नि
ग्धास्थिराहृद्याआहाराः सात्विकप्रियाइतिभगवद्वचनात् ॐ एकरसायेनमः १३ ऐकैश्वर्यदायिनीईशतेप्रेरयत्यंतर्यामित्वेनसर्वानितिश्वरः यस्यसर्वेषुभूतेषुतिष्ठ
न्सर्वाणिभूतान्यंतरोयमयतीतिश्रुतेः तत्प्रेर्यमाणानांजीवानांभूतशब्दवाच्यानामज्ञानकार्यतः करणाहितप्रतिबिंबचैतन्यरूपाणांजाग्रदाद्यवस्थाभिमानिनामंड

त्रि॰भा॰ ब्रह्मसाक्षात्कारवेलायामभेदानुभवतत्त्वमसीत्यादिश्रुतेश्चएकमेवाद्वितीयमितिविशेषितत्वाच्चैकश्चासावीश्वरश्चेत्येकेश्वरः तस्यभावः तदैक्यं तत्प्रददातीतित
६ थाबहुषुविद्याधनवत्सुसत्सुवेश्वेकोविद्याधनवानित्यर्थः तत्रयजननिष्ठाविद्यादेवतदतिशयप्रीतिविदकंचनिरतिशयमणिमादिरूपमैश्वर्यंनिश्रेयसंप्रददातीति
वायद्वा एकंमानुषंसर्वोत्कृष्टसार्वभौमत्वादिलक्षणमभ्युदयसामान्यमैश्वर्यंप्रददातीतिवातथा ॐ एकैश्वर्यप्रदायिन्यैनमः १४ एकातपत्रसाम्राज्यप्रदाआ
तपात् आसमंतात् आध्यात्माधिदेवाधिभूतानिआशब्दार्थः तेभ्यः जनिताः तापाः आतपाः तपंतिपीडयंतीतितिपाः आतपेभ्यस्त्रायतिरक्षतीत्यातपत्रंसर्व
संसारदुःखोपशामकमात्मज्ञानं यज्ज्ञात्वानपुनर्मोहमेवंयास्यसिपांडवेतिभगवद्वचनादखिलदुःखनिदानाज्ञाननिवर्तकं एकंलक्षणयाभिन्नंब्रह्मविषयक
मित्यर्थः एकंचतत्पत्रंचअखंडाकारज्ञानंतेनजायमानंयत्साम्राज्यंसम्राजीराज्ञीभवंसर्वोत्तमत्वंतत्प्रददातीतितथाअथवा एकातपत्रसाम्राज्यंचक्रवर्तित्वंतत्प्र
ददातीतिवा ॐ एकातपत्रसाम्राज्यप्रदायैनमः १५ एकांतपूजिता एकस्यअद्वितीयस्यशोधितत्वंतेपदार्थस्यअंतेउपाधौहृदिपरिच्छेदकत्वात् पूजिता अहमि
त्यपराक्षीकृता यःसाक्षादपरोक्षाद्ब्रह्मेतिश्रुतेः अथवाएकस्यब्रह्मणः अंतेपेउपूजितापतपद्धगत्यवसानार्थयोरितिधातुपाठात् उपपत् ब्रह्ममात्रतयापर्यव
स्यतीत्यर्थः एकांपूजितेतिनाम्नाउपनिषदित्यर्थः अथवा॰ एतेगुहानिवाताश्रयणेप्रयोजयेदितिश्रुतेः एकांतस्थलेध्यानादिनायोगीभिः विषयीकृतेत्यर्थः ६

अथवा कोमश्वरेणएकांतेस्त्रीलिंगेपूजिता संप्रदायप्रवृत्त्यर्थमादावीश्वरेणबहिर्यागक्रमेणमादिसाधनेनसर्गाद्यकालेपूजादिनासंतोषितत्वात् भूतार्थव्यपदे
शः एकांतेसर्वप्रविलापनसमयेपूजिताध्यानादिनासंपादितासाक्षात्कृतेत्यर्थः कश्चिद्धिरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्नितिश्रुतेरितिवा ॐ ए
कांतपूजितायैनमः १६ एधमानप्रभा एधमानाविवर्धमानासर्वातिशायिनिप्रकाकांतिः प्रकाशः यस्याः सातमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभाती
तिश्रुतेः ॐ एधमानप्रभायैनमः १७ एजदनेकजगदीश्वरी एजंतीकंपमानानिचेष्टमानानिप्राणवंतीजीववंत्यनेकानिनानोपाधिकानिजगंतीजंगमानिविच
रत्प्राणिनइत्यर्थः ईष्टेप्रेरयतीतीश्वरीस्थावरांसुखदुःखप्राप्तिपरिहारोपायानभिज्ञत्वेपिस्वजीवनहेतुभूतोदकपानादिप्रवृत्तिदर्शनाच्चेष्टावत्त्वंतत्राप्यस्तीति
जगच्छब्देनिर्विशेषप्रपंचमात्रपरोवक्तव्यः अन्यथासर्वेषुभूतेतिश्रुतोचरप्राणिमात्रपरत्वेसंकोचापत्तेः असतिविरोधेसामान्यवाचकस्यशब्दस्यविशेष
गेलक्षणांगीकारस्यान्याय्यत्वात् अन्यथाब्रह्मणः प्रपंचमात्रोत्पत्त्यादिहेतुत्वंसंकोचितंभवेत् अतएवाकेरजगत्पदमुपात्तयथाकथंचित्क्रियाश्रयत्वेनप्रप
चत्वमात्रस्यसमष्टिहिरण्यगर्भाश्रयत्वेनसर्वेषांप्रयत्वंसंभवतीतिभावः ॐ एजदनेकजगदीश्वर्यैनमः १८ एकवीरादिसंसेव्याः एकः अतितरसाधारण
वीरः पुरश्चर्यादिनाकृतमंत्रदेवतासाक्षात्काराल्लब्धपुरुषार्थः पुमान् विजयप्राप्ताभ्युदयशालीराजनिभूयैर्यगांभीर्यादिगुणवत्त्वेनतत्तद्देवतोपासकाःपुरु

त्रि०भा० षादयः वीराइत्युच्यंते तेयासांशक्तिनांताः आद्यायेयेषांप्राणिकोटिनांतेएकवीरादयः तासांकदंबैः संसेव्याः संसेवितुंयोग्याः येदेश्वरीभक्ताननुगृह्णातिः सगुण
१ स्फगुणविग्रहवतीस्यात् तदानेकपरिवारदेवतापरिसेवितामंत्रदेवतात्वेनोपासनीयत्यर्थः अथवा० एकवीरारेणुकातदादीन्यःशक्तयः शामलाप्रमुखाः ताभिःताःकि
लप्रपंचेस्वस्वपीठास्थिताः सत्यः उपासकानामभीष्टवरप्रदायेदृश्यंते ताः अस्याः परिसेवकत्वेनस्वयमभीष्टवरकामयित्र्यइत्यस्याः प्रकृतायाः महिमातिशयोक्तिः
ॐ एकवीरादिसंसेव्यायेनमः १९ एकप्रभावशालिनी प्रभोर्भावः प्राभवंरक्षकत्वं एकंअनितरसाधारणंचतत् प्राभवंचतच्छालतइतितथा अथवा प्राभव
त्वंस्यसापेक्षकधर्मत्वाद्द्वपदस्यचात्तन्यगामित्वार्थस्यसामानाधिकरण्येनस्वारस्येनपर्यालोचमानेनायमर्थः सूच्यते प्राभवंचनियम्यत्वेकोन्द्रवंविना० अनुप
पद्यमानंतदंतर्गतंतत्कार्यमर्थापत्त्यासिध्यति० तथाचवरबीजवत् स्वांतर्गतपत्राद्यविकार्यवत् कूटस्थंचैतन्यमितिभावः अथवा० प्राभवंनामइश्वरत्वंतदाक्षी
प्तेनियम्यत्वंचोपलक्षणविधयायस्यैकस्याखंडचैतन्यस्यतदेकप्राभवं पादोस्यसर्वाभूतानि० एकांशेनस्थितोजगदितिश्रुतिस्मृतिभ्यांभूतपूर्वगत्याप्राभ
वोपलक्षितं एकं सच्चिच्चैतन्यरूपं चालतेआविष्करोति० तथा अथवा० एकंचतत्प्रभावंचएकप्रभावंमुख्यसार्वभौमत्वमितियत् प्रभुत्वपरंपरायाः सविशेषा
याः कृत्स्नवित्पर्यवसानाभावश्यंभावेएषसर्वेश्वरएषभूताधिपतिरेषभूतपालइतिश्रुत्यांतर्यामित्वयासाक्षाद्वक्तृत्वपादकत्वरूपप्रेरकत्वयुक्त्याचेत्तरवा १

गाद्यवयवप्रेरणातिशयाणांपार्यासिरत्रेवारतीत्यभिप्रायः तथाचनिरंकुशस्यतत्रजगत्कारणत्वरूपतटस्थलक्षणलक्षितवेदांतसमन्वयविषयीभूताखंड
सच्चिदानंदस्वरूपापरदेवतावश्यंस्वस्वरूपेणैवध्यातव्येतिनिष्कृष्टार्थः ॐ एकप्राभावशालिन्यैनमः २० इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीमद्गोविंदभगवत्पू
ज्यपादशिष्यश्रीमच्छंकरभगवत्पादकृतायांत्रिशतीनामार्थप्रकाशिकायांमूलमंत्रद्वितीयवर्णनामार्थप्रकाशनद्वितीयं २ ईकाररूपेति ईकारः रूपंतत्तृतीयाव
यवः यद्वाचकमंत्रस्य यस्याः सातथा ॐ ईकाररूपायैनमः १ ईशित्रीईष्टेईशित्रीसर्वप्रेरकेत्यर्थः ॐ ईशित्र्यैनमः २ इशितार्थप्रदायिनीअर्थ्यंते प्रार्थ्यंतइत्य
र्थः अभ्युदयनिःश्रेयसरूपाः ईतुंगंतुंप्राप्तुमिच्छाविषयभूताः ईप्सिताः तेचतेअर्थाश्चेतिकर्मधारयः ईप्सितार्थानुप्रददातीतितथा केवलकर्मणामदृष्टद्वाराका
लांतरभाविफलदातृत्वमचेतनत्वान्नोपपद्यते तादृशानांकस्मिन्नप्यर्थेसामर्थ्यादर्शनात् चेतनाधिष्ठितानांतुकर्मणाभृत्यकृतपराक्रमादिदृष्टराजवत् तदारा
धितपरेश्वरः कर्माध्यक्षइतिश्रुत्यासर्वज्ञस्यतत्तदधिकृतपुण्यापुण्यानुरूपतयाफलप्रदानेसमर्थस्यसत्वकल्पनेतदन्यस्यचेतनस्यजीवादेस्तत्रसामर्थ्यविरहा
त् सएवततदनुगुणफलविषयकेच्छोत्पादनेनतत्साधनेनतत्साधनानुष्ठापयितासन्ततत्फलकामानांपूरयतीत्यनीश्वरमीमांसमतनिरासोद्रष्टव्यः अथवा ईप्सि
ताजिज्ञासितेत्यर्थः तथाचस्वरूपप्रतिपादकवेदांतश्रवणमनननिदिध्यासनविषयीकृतासत्यर्थप्रार्थ्यमानंसवाभ्याहितं मोक्षरूपंपुरुषार्थंप्रददातीतितथा ॐ

ईशितार्थप्रदायिन्यैनमः ३ ईदृगित्यविनिर्देश्या ईदृक् एतल्लक्षणलक्षितएतादृशपरिमाणएवंस्वरूपः एतादृशाकर्मवानितिप्रत्यक्षसिद्धोविनिर्देष्टुंशक्यते य
च्चक्षुषापश्यंतिइत्यादिश्रुत्यासर्वेंद्रियगोचरत्वनिराकरणत्वात् विनिर्देश्यानभवति औपनिषदानांमतेउपनिषदांवेदैकदेशत्वेनतप्रमाणानपेक्षयातज्ज्ञानार्थंज्ञा
पकत्वेनप्रामाण्यमुररीकृतंइदमेतादृशमितिप्रत्यक्षसिद्धार्थज्ञापनेतासामनुवादकत्वेनसापेक्षत्वरूपमप्रामाण्यंप्रसज्येतेत्यभिप्रायः ॐ ईदृगित्यविनिर्देश्यायै
नमः ४ ईश्वरत्वविधायिनी ईश्वरस्यभावः तदैक्यंविदधाति आवरणविक्षेपशक्तिमदज्ञाननिवर्तकाखंडाकारचैतन्यरूपासत्तिभेदबाधिमात्रसंपादितेश्वरैक्या
योगक्षेमंनिवर्तयतीत्यर्थः स्वेनरूपेणाभिनिष्पद्यतइतिश्रुतेः अथवा ईश्वरत्वंनाम नानादेशविद्याधनोत्कर्षादिमत्वंतत्तत्प्राणिनिकायपुण्यप्रारब्धानुसारेणक
र्मफलंप्रयच्छतीतिवा ॐ ईश्वरत्वविधायिन्यैनमः ५ ईशानादिब्रह्ममयी ईशानतत्पुरुषाघोरसद्योजातवामदेवाख्यानिपंचब्रह्माणितानिमयः स्वरूपंअ
स्याःअस्तीतिसातथा अथवा ईशानः आदिर्येषांतेतथाअधिकारपुरुषाः विष्णुब्रह्मेंद्रादयः तेषामपितत्तन्नामरूपविशिष्टाहंबुद्धिमतामपि अंतर्यामिस्वरू
पेणबुद्धिप्रेरकसच्चिदानंदस्वरूपपरब्रह्मानंदप्रकाशात्मनास्फुरतीतितथा ॐ ईशानादिब्रह्ममयैनमः ६ ईशित्वाद्यष्टसिद्धिदा ईशित्वंआदिर्यासांताःतथा
अणिमामहिमालघिमागरिमाप्राप्तिशताप्राकाम्यंचवशित्वंचयत्रकामाः परागताः इतिवचनात् ताः सिद्धिरष्टौददातीतितथा अणिमाक्षणमात्रेणातिसूक्ष्म १०

भावः लाघवंवागरिमागुरोर्भावः जडतापर्वतादिवद्दारवेशेनअप्रकंपितत्वमित्यर्थः महतोभावः महिमाक्षणमात्रेणवीराडाकृतिमत्वं प्राप्तिः हस्तेनचंद्रादि
मंडलस्पर्शः ईशताइंद्रादीनामपिप्रेरकता प्राकाम्यंअप्रतिहतकामनावत्त्वंवांछितार्थफलप्राप्तिरित्यर्थः वशित्वसर्वलोकवशीकरणसामर्थ्यंयत्रकामाःपरंगताः
काम्यंतइतिकामाः विषयाः यत्रयस्मिन्नैश्वर्यसतिपरगताः बहिर्भूताभवंति विषयाणामनुभवाभावेपितज्जन्यसुखवत्वंआप्तकामाः एताःअष्टसिद्धयः ॐ
ईशित्वाद्यष्टसिद्धिदायैनमः ७ ईक्षित्रिउदासीनद्रष्ट्रीसाक्षिणिअसंगोदासीनज्ञानस्वरूपेत्यर्थः साक्षिचेतेतिश्रुतेः अविसन्निहितंगुहायामित्यादिश्रुतेः ॐ ईक्षि
त्र्यैनमः ८ ईक्षणसृष्टांडकोटिः अंडानांब्रह्मांडानांकोटयः असंख्यातानिभूतभाविकालभेदेनबहुवचनं कोटिशब्दस्यानादित्वात् संसारमंडलस्यईक्षणेनभा
विकार्यत्वेचेनेनसृष्टा अंडकोट्यायययासातथा सदैक्षतबहुस्यांप्रजायेयेति सईक्षांचक्रे आत्मावाइदमेकएवाग्रआसीत् सईक्षतइमानूलोकानुसृजाइतिइत्या
दिश्रुतेः बाह्यकारणमनपेक्ष्योर्णनाभ्यादिदृष्टांतप्रदर्शनेनचेतनस्याभिन्ननिमित्तोपादानप्रदर्शनयुक्तेश्चेतिभावः ॐ ईक्षणसृष्टांडकोट्यैनमः ९ ईश्वरवल्लभा
ईश्वरः कोमेश्वरः वल्लभः पतिर्यस्याः सातथाईश्वराणांब्रह्मविष्णुरुद्रादीनांतत्तन्निष्ठमहिमोत्कर्षरूपेणप्रीत्यत्तिविषयविषयत्वेनाभ्यर्हितेत्यर्थः ॐ ईश्वरवल्लभायै
नमः १० ईडिताईडस्तुताविति धातुपाठात्स्तुतिभिर्विषयीकृतावेदांतैरितिशेषः एषनित्योमहिमाब्राह्मणस्येत्यादिश्रुतेः ॐ ईडितायैनमः ११ ईश्वरार्धां

गशरीरईश्वरस्यसच्चिदानंदात्मकस्यशिवस्यअर्धंचतत्अंगंचअर्धांगंआनंदस्वरूपताशरीरंशरीरत्वस्वरूपलक्षणंयस्याः सातथासच्चिन्मयः शिवः साक्षात्तस्या
नंदमयीशिवेतिश्रुतेः अथवाईश्वरस्याधांगंवामभागःशरीरंमूर्त्तिर्यस्याः सअथवाईश्वरस्यहकारस्यअर्धांगशक्तिबीजंशरीरंमंत्रात्मिकामूर्त्तिर्यस्याः सातथाॐ
ईश्वरार्धांगशरीरायैनमः १२ ईशाधिदेवता ईशस्येत्युपलक्षणं जीवस्यापिईशस्यतत्पदवाच्यार्थस्यमायोपाधिकस्यविशिष्टस्यअधिउपरिविशेषणद्वयपरित्या
गेनदेवताद्योतमानाकूटस्थचिन्मात्रबोधितंपदार्थरूपेत्यर्थः अथवा ईशः कामेश्वरः अधिकः देवतापूज्यायस्या सातथा परमपतिव्रतेत्यर्थः ॐ ईशाधिदेव
तायैनमः १३ ईश्वरप्रेरणकरीईश्वरस्यबिंबचैतन्यस्यरूपासतिजगत्सर्जनादिकार्येप्रेरयित्रीप्रेरणकरीअज्ञापकेत्यर्थः इच्छाज्ञानक्रियाशक्तिरूपावरणविक्षेप
शक्तिमतिफलितचित्स्वरूपाभाविकायानुकूलप्रारब्धाध्यक्षपरमेश्वरेक्षणनामधेयप्रकाशात्मकाभवतीतिभावः ईश्वरप्रेरणंतवाज्ञामनुल्लंघनेनकरोतीत्तिवा
तदीयभार्यात्वेननित्तरांतद्वश्येतियावत् ॐ ईश्वरप्रेरणकर्यैनमः १४ ईशतांडवसाक्षिणीईशस्यतत्पदवाच्यार्थस्यतांडवंनृत्तनवत्प्रयत्नसंपाद्यंलिलामात्रमित्यर्थः
जगत्सर्जनादिरूपक्रियाचलनरूपकर्मत्वंसमानाध्वन्यतेतस्यसाक्षिणीअसंसर्गप्रकाशरूपीत्यर्थः असंगोनहिसज्जत इतिश्रुतेः अथवा ईशतांडवस्यपरमेश्वरनृ
तनाद्यभिव्यंजितचतुःषष्टिकलोपदेशस्यसाक्षिणीतदुक्तं नर्तिकाधिपेरशस्यचतुःषष्टिकलारितिप्रदोषस्तोत्रेईशत्तांडववर्णनमतिस्फुटमितिनेहलिख्यते ॐ ११

ईशतांडवसाक्षिण्यैनमः १५ ईश्वरोत्संगनीलयाईश्वरस्यस्वभर्तुः उत्संगः उत्कृतन्निलयंयस्याः सातथा ॐ ईश्वरोत्संगनीलयायैनमः १६ ईतिबाधाविना
शिनी ईतिबाधाआधिदैविकाद्युपद्रवः क्षुद्रजंतुपीडावातांविनाशयतीतित्तथा ॐ ईतिबाधाविनाशिन्यैनमः १७ ईहाविरहिताअप्राप्तप्राप्तिच्छाईहातया
वीरहिताअप्तकामत्वाद्रहितेत्यर्थः ॐ ईहाविरहितायैनमः १८ ईशशक्तिः ईशस्यशक्तिः सर्वज्ञत्वादिरूपसामर्थ्यंयस्याः सातथादेवात्मशक्तिमित्तिश्रुतेः ॐ
ईशशक्त्यैनमः १९ ईशत्स्मितानना ईशत्स्मितंमंदहासः यस्यतत्तथातादृगाननंयस्याः सातथा पर्याप्तकामत्वेनसर्वदाप्रसन्नमुखीत्यर्थः दुखास्पर्शपरमा
नंदरूपतयावातथा ॐ ईषत्स्मिताननायैनमः २० इतिश्रीमत्परमहंसपरिव्राजकाचार्य॰ तृतीयवर्णार्थप्रकाशनंसमाप्तं॰ लकाररूपाः लकारः रूप्यतइ
तिरूपंमंत्रस्यचतुर्थवर्णत्वेनज्ञापकंयस्याः सातथा ॐ लंकाररूपायैनमः १ ललीता ललित्ता तंत्रेषुसुंदरमितिवचनात् आत्यंतसौंदर्यवती त्रिपुरसुंदरी
त्यर्थः अनुपमसौंदर्यावा ॐ ललितायैनमः २ लक्ष्मीवाणिनिषेविता लक्ष्मीरमासर्वैश्वर्यशक्तिः वाणीसरस्वतीसर्वज्ञानशक्तिः ताभ्यांनितरांभक्ति
मत्प्रेम्णानन्यभूतासत्तिसेवितासेवानामउन्मीलिताज्ञाप्रतिक्षातद्वत्याविव्यर्थः ॐ लक्ष्मीवाणीनिषेवितायैनमः ३ लाकिनीकंसुखंकंब्रह्मेतिश्रुतेः तत्रभव
तीत्यकं ब्रह्माभिन्नतयाप्राप्तियमानंदुःखात्मकंजगत्अकंलीयतइतिलंउपलक्षणमुत्पत्त्यादे॰ लंअकं अस्यानितिलाकिनीअनृतजडदुःखरूपजगत्कारण

त्रि॰भा॰ भूतातद्व्यात्तत्स्वरूपब्रह्मभूतेत्यर्थः ॐ लाकिन्यैनमः ४ ललनारूपारूप्यतेज्ञायतेतेनेतिरूपंज्ञापकंतद्व्याप्यलिंगचिह्नमितिवाललनास्त्रीणांरूपंवेषःआभ
१२ रणाद्यलंकारोवाअकृतिर्वायस्याःसातथाललनाःस्त्रीयःरूपाणिविभूतयःयस्याःसातथालिंगांकितंपश्यजगद्भगांकितमितिपुराणवचनात् ॐ लल
नारूपायैनमः ५ लसद्दाडिमपाटलालसद्दाडिमशब्देनविकसितंतत्पुष्पंलक्ष्यतेलसत्विकसितप्रकाशंतच्चतद्दाडिमंचइदमुपलक्षणंवंधूकादीनांतद्वत्पाटलाः
श्वेतमिश्रितरक्तवर्णप्रधानमूर्तिमतीत्यर्थः श्वेतरक्तस्तुपाटलमितिवचनात् ॐ लसद्दाडिमपाटलायैनमः ६ ललंतिकालसत्फाला ललंतिकयापरितःमु
क्ताफलरचितेनवस्त्रमध्ययाललाटमध्यदेशभूषयाइदमुपलक्षणं ललाटपट्टादीनांलसत्फालंयस्याःसातथा ॐ ललंतिकालसत्फालायैनमः ७ लला
टनयनार्चिता ललाटेनयनंयेषांतेअत्रललाटनयनशब्देनभ्रूमध्यंलक्ष्यते नयनशब्देनज्ञानमपि तथाचऊर्ध्वदृष्टिःखेचरीमुद्राविलीनचित्तैः नासिकाव
रुणमध्यदेशाभिधानाविमुक्तकृतपरमेश्वराराधनपरपुरुषप्राप्यत्वाभिधायका अत्रिप्रश्नोत्तरजाबालश्रुतिगतयाज्ञवल्क्योत्तरवाक्यनिर्दिष्टजयसिद्धिम
त्पुरुषैरर्चितासाक्षात्कृतेत्यर्थः अथवात्तृतीयनेत्रवताशिवेनतत्त्वरुद्रैर्वापूजितेत्यर्थः ॐ ललाटनयनार्चितायैनमः ८ लक्षणोज्वलदीव्यांगी दीव्यतेप्र
काश्यतइतिदिव्यंलक्षणैः स्वरूपतटस्थनामकैः उज्वलंशोधितंशुद्धंअंगंस्वरूपंविग्रहोवाव्यतकाठिन्यन्यायेनतदात्मानं२स्वयमकुरुतइतिश्रुतेः सच्चि १२

दानंदघनीभावात्मकोविग्रहोयस्याःसातथाअथवासामुद्रिकशास्त्रोक्तदिव्यलक्षणैः उज्वलानिःसंप्रदारक्तानिदिव्यानिअंगान्यवयवाः शिरःपाण्यादयः
अस्याःअस्तीतितथा ॐ लक्षणोज्वलदिव्यांग्यैनमः ९ लक्ष्यकोट्यंडनायिका लक्षणानिचकोटयश्चअसंख्यातान्यपरिमितानीत्यर्थः संसारस्यानादित्वेन
भूतभविष्यदादिभेदेनबहुसंख्यावत्वमंडानांतथाविधानिचतान्यंडानिचहिरण्यगर्भविराड्रूपाणिसमष्टिव्यष्ट्यात्मनाविश्वतैजसोपाधिभूतानितेषामधिष्ठा
नबिंबचैतन्यात्मनानयतिस्वसत्तामापादयतीतिनायिका ॐ लक्ष्यकोट्यंडनायिकायैनमः १० लक्ष्यार्थालक्षणयाशोधनया जहदजहल्लक्षणयावाप्रति
पाद्यवेदांतमहामहावाक्यार्थानांयोर्थःतत्स्वरूपयोगशास्त्रप्रसिद्धबहिरांतरूर्ध्वयप्रदेशविशेषरूपभूमिकासुस्वस्वमनोवांछाविषयदेशसगुणत्वेननिर्गु
णत्वेनवामनोविलयरूपाहठराजयोगादिसाधनपरिपाकवशेनसाक्षात्कृतंचैतन्यंलक्ष्यइत्युच्यतेअर्थ्यतेयाच्यतेगुरुंप्रतीत्यर्थः लक्ष्योयोर्थःचित्स्वरूपपर
मानंदरूपःसोपिसैवेतितथा ब्रह्मैवेदममृतंपुरस्तात्पश्चात् ब्रह्मदक्षिणतश्चोत्तरेणइतिश्रुतेः ॐ लक्ष्यार्थायैनमः ११ लक्षणागम्यालक्षणानामशक्या
र्थेवाचकस्यपदस्यान्वयाद्यनुपपत्यातत्संबंधिपदार्थांतरज्ञानहेतुः शक्यसंबंधादिःपदजन्यपदार्थज्ञानहेतुः शब्दवृत्तिरुक्तेतस्याः वाच्यवाचकेतत्संबं
धादिभेदज्ञानपूर्विकायाः परिछिन्नसावयवपदार्थसंबंधज्ञानहेतोः केवलचिन्मात्रनिरूपाधिके वस्तुनिषष्टिजात्यादिनांलक्षतावच्छेदकधर्माणामभावे

त्रिं॰भा॰ लक्षणयापदप्रवृत्त्ययोगात् तयागम्यागंतुज्ञातुंयोग्यंगम्यंतत्रभवतीत्यगम्यावेदांतिमतेजहदजहल्लक्षणयाविशेषणमात्रपरित्यागस्यअन्योन्य १ता
१२ दात्म्यानुपपत्त्याबोधितत्वात्तदर्थेसाअवश्यमंगीकर्तव्याविशेषस्यज्ञानस्वरूपत्वेनित्यतमाल्लक्षणाजन्यत्वात्तदर्थेसानपेक्षितेतिभावः तथाच प्रकृतायाः देवतायाः
शुद्धचैतन्यमात्रस्वरूपतयास्वयप्रकाशत्वेनलक्षणागोचरत्वात्लक्षणागम्यत्तिनामयुक्तमितिभावः ॐ लक्षणागम्यायेनमः १२ लब्धकामालब्धाः काम्यंत
इतिकामाः ऐहिकामुष्मिकासुखसाधनानिलक्षणतयातत्तजन्यसुखानिवातदाप्तृताः कामाः ययातत्तथा पर्याप्तकामेत्यर्थः पर्याप्तकामस्यकृतात्मनस्त्विहैवासर्वेप्र
लीयंतिकामाः इतिश्रुतेः ॐ लब्धकामायेनमः १३ लतातनुः लताइवलताः कल्पादिवल्ल्यः सकलपुरुषार्थप्रदत्वेनजगत्तिप्रसिद्धाः ताइवसुकुमारलाघाश्रयावात
न्मूर्तिः यस्याः सातथा ॐ लतातनवेनमः १४ ललामराजदलिका ललाम्नाकस्तूरीतिलकेनकस्तूरीपत्रेणवाराजन्नूविभ्राजन्नूपरमशोभिअलिकंकललाटंयस्याः
सातथा ॐ ललामराजदलिकायेनमः १५ लंबिमुक्तालतालंबिन्यः लंबमानाः अथप्रस्मराः मुक्ताहराः मुक्ताफलानिवायस्याः सानवरत्नखचित्तसुवर्णमु
कागुच्छैः सर्वांगेषुप्रलंबमानेः ललाटपर्यंतलंबमानकिरीटप्रथमभागललाटपट्टनासाग्रताटंकाधः कर्णदेशकंठप्रदेशहस्तचतुष्टयांगदसमानप्रदेशकूर्पासपरि
तः पदकाव्यपदेशकटिनिबंधकाच्यादिषुपरिलंबमानेत्यर्थः ॐ लंबिमुक्तालतांवितायेनमः १६ लंबोदप्रेसुः लंबोदरस्यमहागणेशस्यप्रसूः जनयित्रीमा १२

तेत्यर्थः लंबोदरप्रसूयतइतिवा ॐ लंबोदरप्रसवेनमः १७ लभ्या संसारदशायामात्मावा काज्ञानेनस्फुटमप्रकाशमानासति श्रवणादिसंस्कृतांतःकर
णवृत्ताखंडाकारज्ञानानामिकायां प्रतिफलितस्वरूपेणविस्मृतकंठगतकणकभूषणवत् प्राप्तप्राप्तिरूपतयालब्धुंयोग्येतितथा ॐ लभ्यायेनमः १८ लज्जा
ढ्या लज्जयाउपलक्षणमंत्तः करणधर्माणांसर्वेषांअध्यात्तद्धत्वेनानुकारवतीत्यर्थः तिरोधानादीनांतर्हितासतिवरदीप्रयच्छतीतिलज्जाढ्यावभवतीतिवोपचर्य
ते ॐ लज्जाढ्यायेनमः लयवर्जिताअविनाशीवाअरेयमात्मा अनुच्छत्तिधर्मेतिश्रुतेः लयोविनाशः तेनवर्जितारहितेत्यर्थः इदमुपलक्षणंषड्भवविकाराणां
म सत्यंज्ञानमनंतंब्रह्मेत्यादित्यैर्थश्रुतेः ॐ लयवर्जितायेनमः २० इतिश्रीपरमहंस॰ आदिमलकारनामार्थप्रकाशनेचतुर्थं ४ ह्रींकाररूपाः ह्रींकारःरूप्य
तेनिर्दिश्यते इतिरूपमंत्रपंचमावयवः यस्याः सातथा ॐ ह्रींकाररूपायेनमः १ ह्रींकारनिलया ह्रींमक्षरं निलयंग्रहवदवच्छेदकंयस्यास्याः सातथा स्वीयवा
चकत्वारोपितवाच्यतावच्छेदकधर्मावच्छिन्नतादिसंपादनेनगृहवर्त्तिपुरुषवद्व्यारत्तस्वरूपेणज्ञापकंभवति अन्यथा नाम्नोवाच्यार्थे प्रवर्त्यंतयोगापातादितिभा
वः ॐ ह्रींकारनिलयायेनमः २ ह्रींपदप्रियाः ह्रींमितिपदंपद्यते गम्यते ज्ञायतेनेनेतिपदं पद्यतेगम्यतेप्राप्यतइतिवापदं ह्रींकारस्यमंत्रावयवतयातद्दे
वताप्रकाशकत्वेनतस्यांशत्वात् शक्तपदपतितलक्षणात् तथाप्रथमव्याख्यानं हकाररेफइकारानुस्वाराणां वर्णानांसमष्टिरूपेणसमुदायात्मत्वात्तद्वर्ण

समुदायः पदमित्यपिपदलक्षणवत्वमस्यघटतेपुरश्चर्यावतांस्वदेवतासाक्षात्कारद्वारासकलपुरुषार्थप्रापकत्वात् द्वितीयव्याख्यानंतथाचोक्तं तस्मिन्प्रियाप्रि
यवतीत्यर्थः ॐ ह्रींपदप्रियायैनमः ३ ह्रींकारबीजा ह्रींकारएवबीजंस्ववाचकमंत्रभागः ज्ञापकंदेवतानांयद्बीजमक्षरमुच्यतइतिवचनात् ह्रींकारस्यमाया
प्रकाशकत्वेनवटधानादिः स्वनिष्ठवृक्षाभिव्यंजकत्वेनकारणतयायथाबीजमित्युच्यते सत्कार्यवादिनामव्यक्तनामरूपकारणं बीजमभिव्यक्तनामरूपात्मकंप
श्वादविकार्यमित्यंगीकारः सकलकारणसमवधानेविशेषनामवत्तद्रूपयाकारणस्याभिव्यक्तिस्सपतिः तथाचोक्तंबीजस्यमायावच्छिन्नचैतन्याभिव्यंजकत्वेना
अपिबीजत्वंतादृशंह्रींकारबीजंयस्याः सातथा ॐ ह्रींकारबीजायैनमः ४ ह्रींकारमंत्रायैनमः ह्रींकारस्यमननात् त्रायतेः रक्षतिवाच्यवाचकयोरभेदादिति
तथा ह्रींकारघटितंमंत्रोवायस्याः सातथा ह्रींकारमंत्रोएवयस्याः सेतितया ॐ ह्रींकारमंत्रायैनमः ५ ह्रींकारलक्षणाः हकारः शिवःआकाशबीजत्वान्नि
र्लेपः रेफः बह्निबीजं कार्योत्पादनसन्निहितशक्तिमदीश्वरवाचकः तथाच हकारयुक्तोरेफः शुद्धचैतन्यमेवकारणतावच्छिन्नमितिवदति: इकारः मन्मथबीजं त
त्कारणलक्षकंतयास्थितिहेतुविष्णुरूपचैतन्यंअभिदधातिः अनुस्वरः तस्मिन्नेवपदार्थेअभिन्ननिमित्तोपादानेलयं वक्ति तथाच ह्रींमित्युक्तेजगदुत्पत्तिस्थिति
लयकारणचैतन्यंशक्यावाच्यार्थः प्रतियते तस्यैवोपाधिपरित्यागरूपलक्षणायस्याः सातथा ह्रींकारः लक्षणंतटस्थलक्षणं यस्याः सेतिवतथा ॐ ह्रींका १४

रायैनमः ६ ह्रींकारजपसुप्रीता ह्रींकारस्यजपः ह्रींकारजपः तेनसुप्रीताः ॐ ह्रींकारजपसुप्रीतायैनमः ७ ह्रींमतिवाचकत्वेनलक्षणकत्वेनवाविशिष्ट
तदर्थेरूपेणवावाच्यवाचकयोरभेदेनयस्याः अस्तीति ह्रींमती ॐ ह्रींमत्यैनमः ८ ह्रींविभूषणा केवलजडमायावाचकः ह्रींकारः तथाहिहकारः स्वेतपदार्थः
रेफः लोहितार्थकः इकारः नीलार्थकः तथाचविशिष्टस्यशुक्लरक्तनीलवस्तपदार्थवाचकतया सत्वरजस्तमोगुणवत् प्रकृति वाचकत्वेनपरिच्छिन्नान्ततदुःखरूपवाच्या
र्थकतया प्रकाशराहित्येनानुपादेवतायांसत्यांतदवच्छिन्नस्वप्रकाशकचैतन्याकारतयाविशिष्टार्थस्यापादमस्तकभूषिततरुणीवदानंदस्वरूपतयातद्वत्वकेन्ह्रींपदस्याष्टै
श्वर्यप्रसिद्धिप्रदानशक्त्याधायकतयाशोभायमानंभूषणवत् कुंडलीपुरुषइत्यत्रकुंडलैर्येयोपलक्षणतयाइतरसजातीयाद्व्यावर्तकत्वंतथाजस्यापिजीवस्योत्तरव्या
र्त्तवाच्यार्थगोचरप्रमाजनकत्वेनभूषणवद्यस्याः सातथा ॐ ह्रींविभूषणायैनमः ९ ह्रींशिला ह्रींमित्यनेनतद्वाच्यार्थः ब्रह्मविष्णुरुद्राः लक्ष्यंतेतेषांशीलंस्व
भावः पारमार्थिकस्वरूपंसंविदात्मकतयायस्याः सातथा तन्निष्टधर्मोवासत्वरजस्तमोगुणादयोवायस्याः सातथा शीलस्वभावे धर्मेचेतिवचनात् ॐ ह्रींशिलायै
नमः १० ह्रींपदाराध्या ह्रींपदेनएकाक्षरबीजमंत्रेणआराधितुंयोग्यतथा ह्रींकारेणैवसंसिद्धोभुक्तिमुक्तिचविंदतीतिभुवनेश्वरीकल्पवचनात् ॐ ह्रींपदाराध्या
यैनमः ११ ह्रींगर्भाह्रींशब्दासुगुणमूर्त्तयस्तिस्रः गर्भेस्वस्वरूपेसशक्तिकाः अविनाभावसंबंधेनयस्याः सातथा ममयोनिर्महत् ब्रह्मतस्मिन्गर्भंदधाम्यहं इति

भगवद्वचनात् ॐ ह्रींगर्भायैनमः १२ ह्रींपदाभिधा ह्रींकारः अभिधानः यस्याः सा तथा समष्टिरूपायाः समष्टिशब्दवाच्यत्वनियमादित्यभिसंधिः ॐ ह्रीं
पदाभिधायैनमः १३ ह्रींकारवाच्या मायोपाधिकब्रह्मणि कल्पितधर्मेण शब्दप्रवृत्त्युपपत्तेः ह्रींपदीयवाच्यार्थस्वरूपेत्यर्थः ह्रींकारवाच्यायैनमः १४ ह्रींकारपूज्या
मूलमंत्रेणपूजयेदितिपूजांगत्वेनमूलमंत्रोविनियोगः श्रूयतेमूलमनुश्चदेवतायाः स्वकनामेतिवचनादंतर्मुखानामस्यैवमंत्रशास्त्रेषुतन्नाम्नाव्युत्पन्नत्वात् ह्रींका
रंनमोतमुच्चार्ययथागुरुसंप्रदायीश्रीचक्रादौमूलदेवतापूजनीयेत्यागमरहस्यात्ह्रींबीजेनैवपुजितुंयोग्या अतिप्रियबीजनामत्वादित्यभिप्रायः ॐ ह्रींकारपूज्यायै
नमः १५ ह्रींकारपीठिकाअत्रपीठशब्दः आधारत्वलक्षकः वाच्यार्थोहिवाचकशब्दस्यसत्ताप्रदत्वेनाधारोभवतिमंत्रदेवतयोरभेदेव्यर्थनिष्ठमहिम्नः तद्वाचकप
देहस्यमानत्वात्कल्पितभेदंसंपाद्येदमुच्यते ह्रींकारस्यपीठिकावृत्तिस्थानंशत्त्यागोचरतांयात्तांविषयभूतेत्यर्थः ॐ ह्रींकारपीठिकायैनमः १६ ह्रींकारवेद्यास्वरू
पत्तः निर्गुणब्रह्मात्मतयाअज्ञानविषयत्वाश्रयत्वाभ्यामप्राप्तपुरुषार्थरूपतयासंसारदशायांप्रतियमानत्वात्गुरूपसदनश्रवणादिविध्यप्रामाण्यनिरासायलक्षण
याशुद्धस्वरूपपरमानंदतयाप्रापितत्वाच्छ्रवणादिजन्यवृत्तिव्याप्यत्वरूपवेदनाविषयत्वं ब्रह्मण्यज्ञाननाशायेष्टतिव्याप्तिरिहोच्यते मामेवयेप्रपद्यंतेमायामेतामि
त्यादिवचनात्भगवत्पादैरंगीकृतमितिहिंकारेणमुख्यावृत्तेनवेद्यावेदितुंयोग्यातत्स्वरूपपरिज्ञानद्वारातत्प्राप्तिरूपपुरुषार्थहेतुत्वादितितात्पर्यं ॐ ह्रींकारवेद्यायै १९

नमः १७ ह्रींकारचिंत्याअस्यबीजस्यपंचप्रणवांतर्गतत्वेनोंकाराभेदेब्रह्मप्रतीकत्वाविशेषात्प्रणवेयथापरापरब्रह्मोपासनहेतुत्ववदस्मिन्नपिप्रतीकेतद्वती
तिविकल्पः यद्वाभक्तिपार्थक्येनमंत्रविशेषेषुभवतीतियोगवेदभार्गरहस्यं नवाद्यस्याप्यवकाशः ह्रींकारेउभयविधब्रह्मरूपतयाचिंतितुंयोग्यध्यानस्यसाक्षात्का
रः प्रत्याहारहेतुपकारकत्वेनध्यातव्येत्यर्थः ॐ ह्रींकारचिंत्यायैनमः १८ ह्रींहृहरणइतिधातुपाठात्सर्वं भक्तविश्वर्यप्रदानातिशयतयाध्यारोपाधिष्ठानत्वेसत्य
पदावशेषितपरमानंदरूपामुक्तिरित्यर्थः ॐ ह्रींनमः १९ ह्रींशरीरिणीमूलमंत्रात्मिकेतियावत् ह्रीमेवशरीरंमूर्त्तिरस्ती ह्रींशरीरिणी ॐ ह्रींशरीरिण्यैन
मः २० इतिश्रीमत्परमहंस॰ ह्रींकारनामार्थप्रकाशनंपंचमंसमाप्त॰ द्वितीयं ॐ हकाररूपा· हकाररूपंषष्ठावयवः यस्याः सामूलविद्यावाच्यार्थवाचकंयस्याः
सातथा ॐ हकाररूपायैनमः १ हलधृक्पूजिता हलंआयुधंतं इतिहलधृक् बलरामः तेनपूजिता ध्यानादिभिराराधितेत्यर्थः ॐ हलधृक्पूजितायैनमः २
हरिणीक्षणा हिरण्याः हरिण्याः ईक्षणमिवईक्षणंयस्याः सातथा अतिसंतोषेणकातराक्षीतिभावः सर्वत्रसर्वदादृष्टिरितिवा भक्तेष्वादरदर्शनवतीतिवा ॐ हरि
णीक्षणायैनमः ३ ॐ हरप्रिया हरस्यप्रिया शिववल्लभेत्यर्थः हरः प्रियः यस्याः साइतिवा ॐ हरप्रियायैनमः ४ हराराध्या हरेणस्वभर्त्रा ययाराधितुंयो
ग्याकेवलसच्चिदानंदरूपत्वात् ॐ हराराध्यायैनमः ५ हरब्रह्मेंद्रवंदिता· हरिः रमेशः ब्रह्मावा शः इंद्रः देवेशः उपलक्षणंसर्वदेवभेदानांतैः वंदितानमस्कृता ॐ

त्रि०भा० हरिब्रह्मेंद्रवंदितायैनमः ६ हयारूढासेवितांघ्रिः हयारूढानामः अश्वमात्रसेनानीशक्तिः वश्यकरीतयासेवितौ अंघ्रीयस्याः सातथा ॐ हयारूढसेवितांघ्र
१६ येनमः ७ हयमेधसमर्चिता हयमेधेनअश्वमेधेनसमर्चित्ता पूजिताः पुरुषत्वादिप्राप्तोइत्थादिभिरित्यर्थः ॐ हयमेधसमर्चितायैनमः ८ हर्यक्षवाहनावाह
तीतिवाहनंहर्यक्षः केसरीवाहनयस्याः सातथामहालक्ष्मीस्तादुर्गेत्यर्थः ॐ हर्यक्षवाहनायैनमः ९ हंसवाहना हंतिगच्छतीति हंसः सूर्यः प्राणोवा वा
हनवत् आधारभूतप्रतीमित्यर्थः अभिव्यक्तिस्थानमितियावत् सयश्चाहंपुरुषेयश्चासावादित्येसएकइतिश्रुतेः अथवा हंसवाहनाब्राह्मीरूपेत्यर्थः
ॐ हंसवाहनायैनमः १० हतदानवाहताः दानवाः अनेकप्रकारशक्तिरूपेधरयाभंडासुरादयः ययासातथा ॐ हतदानवायैनमः ११ हत्यादिपापशम
नी हत्याब्रह्महत्याआदिः येषांतानितथा पापानिशामयतीतितथा हरिर्हरतिपापानीतिवचनात् ॐ हत्यादिपापशमिन्येनमः १२ हरिदश्वादिसेविता० ह
रिद्वर्णाः नरकतइवअश्वायस्येंद्रस्यतथासः आदित्येषांदिक्पतीनांतैः सेविता चरणारविंदसन्निधिकरतयाश्रित्येतेत्यर्थः ॐ हरिदश्वादिसेवितायैनमः १३
हस्तिकुंभोत्तुंगकुचाः हस्तः अस्यास्तीतिहस्तीः तस्यकुंभौतद्वत्उन्नतौकुचौसांद्रौयस्याः सातथा ॐ हस्तिकुंभोत्तुंगकुचायैनमः १४ हस्तिकृत्तिप्रियांगनाः ह
स्तिनःकृत्तौचर्मणियः प्रीतिमान्शिवः तस्यांगनाभामिनीत्यर्थः ॐ हस्तिकृत्तिप्रियांगनायैनमः १५ हरिद्राकुंकुमादिग्धाः हरिद्राकुंकुमाभ्यांमिश्रकपलक्ष १६

णंकस्तूरीपत्रादिनादिग्धालिप्तेत्यर्थः ॐ हरिद्राकुंकुमादिग्धायैनमः १६ हर्यश्वाद्यमरार्चिता हर्यश्वः सुरेश्वरः आदिर्येषांममराणांतैरर्चिता किंकरत्तयानि
यामकत्वेनपूजितेत्यर्थः ॐ हर्यश्वाद्यमरार्चितायैनमः १७ हरिकेशसखीः हरिद्वर्णाः केशाः शिरोरुहाः यस्याः हिरण्यश्मश्रुः हिरण्यकेशइतिश्रुतेः तस्यस
खीप्रयोजनमनपेक्षीयकारिणीत्यर्थः वर्णेननीलेनहरिणाविष्णुनासमाः शिरोरुहाः अस्यास्तीतिवा० हरिकेशसमाः केशाः अस्यास्तीतिसर्वांगसुंदरनित्ययौ
वनवीद्रपररहितकामेश्वरइतिवार्थः ॐ हरिकेशसख्येनमः १८ हादिविद्याः लोपामुद्रोपासीतमनुरूपेत्यर्थः ॐ हादिविद्यायैनमः १९ हलामदालसा० ह
लायाः अमृतमदनोद्भूतावारुण्याः मदनेनउल्लसेनल्लसा आरक्तनेत्रांतरोमांचादिविवहतीत्यर्थः ॐ हलामदालसायैनमः २० इतिश्रीमत्परमहंसपरि
व्राजकाचार्य० २ खंडेयमवर्णप्रकाशनसमासं १ ॐ सकाररूपाः सकाररूपः द्वितीयखंडद्वितीयावयवविज्ञापकं सातथा ॐ सकाररूपायैनमः १ सर्वज्ञाः
अलुप्तनित्यज्ञानस्वरूपेणसामान्यरूपेणसर्वंजानातीतिसर्वज्ञाः यः सर्वज्ञइतिश्रुतेः ॐ सर्वज्ञायैनमः २ सर्वेशी सर्वस्यकार्यस्यांतर्यामिरूपेणेष्टेः प्रेरयतीति
तथा ॐ सर्वेश्येनमः ३ सर्वमंगलाः सर्वप्रकारेणशुद्धविशिष्टचैतन्यस्वरूपेणमंगलाः परमानंदस्वरूपाः अत्रबहुव्रीहिरविवक्षितत्वात् विवक्षायांवासुंदरकायो
राजाइत्यादिवत्समानार्थः अथवासर्वेषांमंगलंयस्याः सातथा सर्वैः प्रकारैः ध्यानकीर्त्तनपूजानमस्काराद्यत्यभक्तिजन्यैकैर्यैर्जडानामपिमंगलंसुखंयस्याः

सकाशात्प्राप्यतेसातथा सर्वेषामात्मरूपतयाप्रतीयमानंमंगलंसुखंस्वरूपंयस्याःसेतिवा॰ सर्वशब्दवाच्याःसर्वकारणंशिवःतस्यमंगलंसुखंयस्याःजा
यतेसातथासच्चिन्मयःशिवःसाक्षात्तस्यानंदमयीशिवेतिवचनात् अथवामंगलशब्देनमंगलहेतुभूताःस्त्रियोलक्ष्यंते सर्वेषांप्राणिनांमंगलसाधनभूताः
योषाःस्वाभिन्नसच्चिदानंदत्वेनयस्याःसातथा एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीतिश्रुतेरित्यर्थः अशुभानिनिराचष्टेतितेनोऽशुभसंततिः
स्मृतिमात्रेणयत्पुंसांब्रह्मतन्मंगलंविदुरित्यादिवचनात् ॐ सर्वमंगलायैनमः ४ सर्वकर्त्रीःसमस्तस्वशक्त्यामायारूपयाकरोतीतिवा॰ ईशातईशनीभिर्जन
नीभिः परमशक्तिभिरितिश्रुतेः ॐ सर्वकर्त्र्यैनमः ५ सर्वभर्त्री सर्वंबिभर्तीतिवा एषविधृतिरेषांलोकानामितिश्रुतेः ॐ सर्वभर्त्र्यैनमः ६ सर्वहंत्री सर्वंह
रतीतितथा एभिर्नामत्रयैर्यतोवाइत्यादिश्रुत्युक्ततटस्थलक्षणत्रयमभिहितमितिवेदितव्यं ॐ सर्वहंत्र्यैनमः ७ सनातनाजजोनित्यःशाश्वतोयंपुराणो
इतिश्रुतेः नित्यशुद्धसिद्धस्वरूपेत्यर्थः ॐ सनातनायैनमः ८ सर्वानवद्यासर्वैः ज्ञानैश्वर्यादिगुणैरनवद्या अवद्यानामकयाविद्ययाहीनाजप्रकृतिः मिथ्या
बाध्यमानत्वात् तद्विलक्षणासत्यज्ञानानंदरूपत्वात् अनवद्या सर्वेषांसर्वाभीष्टप्रापकत्वेनस्तुत्यावा॰ ॐ सर्वानवद्यायैनमः ९ सर्वांगसुंदरीसर्वाणिच
तान्यंगानिचावयवाःशिरःपाण्यादयःतेष्वन्यजनातिरिक्तभवत्वात्प्रायसामुद्रीकलक्षणंतद्वत्वेनसर्वांगसुंदरी अथवासर्वेषांमंगेषुशरीरेषुब्रह्मरूपतया ९७

अत्यंतप्रेमविषयत्वेनसुंदरपदार्थवदविनाभाववांछाविषयत्वात्तया ॐ सर्वांगसुंदर्यैनमः १० सर्वसाक्षिणीसर्वजडानांकार्याणांस्फूर्त्याधायकत्वेनप्र
काशकर्त्रीतथा सर्वसाक्षाद्दीक्षितेतिवातथा ॐ सर्वसाक्षिण्यैनमः ११ सर्वात्मिकासर्वेषामात्मस्वरूपत्वात् यच्चाप्नोतियदादत्तेयच्चातिविषयानिह यच्चा
स्यसंततोभावःस्तस्मादात्मेतिगीयतेतिवचनातथा ॐ सर्वात्मिकायैनमः १२ सर्वसौख्यदात्री सुखिनोभावः सौख्यसर्वाणितानिप्रीयंमोदप्रमोदानंदश
ब्दवाच्यानि इष्टशब्दजन्यसुखंप्रियं तल्लाभजन्यमोदः तदनुभावजन्यंप्रमोदः आनंदः समष्टिजीवःभोक्ता तानिददातीतितथा सर्वप्रकारैःस्मरणादिभिः
सौख्यंददातीतिवातथा एषह्येवानंदयातीतिश्रुतेः ॐ सर्वसौख्यदात्र्यैनमः १३ सर्वविमोहिनीसर्वान्विमोहयतिअन्यथाग्राहयति अज्ञानेनावृतंज्ञानंतेन
मुह्यंतिजंतवइति अनृतेनहिप्रत्यूढ इतिश्रुतिस्मृतिगम्यमज्ञानावरणशक्तिकार्यमोहनादिसत्ताप्रकाशादिप्रदाधिष्टानत्वेनउपचारात् सर्वमोहिनीत्युच्यतेअयोदहतीति
त्तिवा ॐ सर्वविमोहिन्यैनमः १४ सर्वाधाराब्रह्मपुच्छंप्रतिष्ठेतिश्रुतेः सर्वेषांहृदयानिआधारःअभिव्यक्तिस्थानमुपासनायस्याःसेतिवातथा ॐ सर्वाधारा
यैनमः १५ सर्वगता सर्वगच्छतीतितथा अनेनजीवेनात्मनानुप्रविश्यइतिश्रुतेः ॐ सर्वगतायैनमः १६ सर्वावगुणवर्जिता अवजवहमानहेतवश्चगुणा
श्चतथा अध्यात्मिकसंबंधेनआरोपितासत्वादयः समष्टेःअंतःकरणधर्माःकामदयः व्यष्टेःसर्वेचतेअवगुणाश्चतया॰ सर्वांतर्यामित्वेन सर्वानुस्यूतत्वेपि

त्रि०भा० तत्तदुपाधिनिष्ठोत्तमाधमधर्मैर्नसंबंध्यतेघटादिनिष्ठाकाशवत् कोशांतर्गतखंडवद्वासूर्योयथासर्वलोकस्य चक्षुर्नलिप्यते चाक्षुषैर्बाह्यदोषैः एकस्तथास
१९ र्वभूतांतरात्मानलिप्यतेलोकदुःखेनबाह्यइतिश्रुतेः ॐ सर्वांगुणवर्जितायैनमः १७ सर्वारुणा सर्वेष्वंगेषुआरुणाआरक्तवतीआसीयस्ताम्रोअरुणइति
श्रुतेः ॐ सर्वारुणायैनमः १८ सर्वमातासर्वेणकार्येणमीयतेअभेदेनइतितथा तथाहिइदंजगत्ब्रह्माभिन्नंतत्सत्तास्फूर्त्तिनियतसत्ताप्रकाशज्ञानविषयत्वात्
यः यन्नियतसत्ताप्रकाशवान् सतदभिन्नः तथात्वंतुकार्यः पटइतिसर्वानुमिनोति स्वाभेदेनजानातीतिवातथा ॐ सर्वमात्रेनमः १९ सर्वभूषणभूषितासर्वात्मि
कत्वेनयेमप्राणिनः यानियानिभूषालंकारभोजनादिभोग्यवस्तून्यात्मार्थेसंपादयंति तेषांसर्वेषांप्रत्यक्तयासैः सर्वैर्भूषिताउपकृतेत्यर्थः आत्मनस्तुका
मायसर्वंप्रियंभवतीतिश्रुतेः अथवासैर्वैर्भक्तजनैः तत्तदवयवेषुभूषणैरारोपितास्वस्याः महाराज्ञित्वेनासंगोदासीनभावत्वादितिभावः यद्वासर्वदेशकालेलोके
षुभूषणैः तत्रतत्रभवैरुच्चावचैर्भूषणैर्भूषिताहस्त्यश्वादिदेहोपाधिकासत्तितत्तदीयकरादिषु जुगुप्साविरहितेत्यर्थः भूषयंतिसर्वासमग्रत्वेनप्रतिपादयंतीतिभू
षणानिवेदांतमहावाक्यानिसर्वैःसमस्तैः तैः गतिसामर्थ्यार्थः एकतात्पर्येणभूषिता लक्षणयापर्यवसितासमन्वितवेत्यर्थः ॐ सर्वभूषणभूषितायैनमः २०
इतिश्रीमत्परमहंस० द्वितीयवर्णनामार्थप्रकाशनंसमाप्तं २ ॐ ककारार्थाः कंब्रह्मेतिश्रुतेः तस्यमुख्यार्थः सच्चिदानंदलक्षणंब्रह्मैव आत्मैवेदं सर्वं ब्र १९

त्मैवेदं सर्वंइत्यादिश्रुत्यातद्व्यतिरिक्तस्यातदस्येत्यर्थबाधितत्वात् ॐ ककारार्थायैनमः १ कालहंत्रीअजपारूपेणप्राणापाननामकचंद्रसूर्यनियमनेपुरुषा
णांनियमितपरिमितायुस्वरूपैकविंशतिषट्शताधिकसहस्रसंख्याकनिर्गमरूपेणक्षावपिताअवशेषायुषोयुगकल्पाद्यवशिष्टस्यरक्षैपुनः पुनः संयमने
तथाचरक्षैयुंजानस्यसर्वप्राणेंद्रियस्यवृत्तिलयेमनोन्मन्यवस्थानिष्पद्यतेतथाचश्रुतेः पृथिव्यप्तेजोनिलखेसमुत्थितेपंचात्मकेयोगगुणेप्रवृत्ते नतस्यरो
गोनजरानमृत्युः प्राप्तस्ययोगाग्निमयंशरीरमिति अध्यात्मयोगाधिगमेनदेवंमत्वाधीरोहर्षशोकौजहातीतिच तथाच तदानीमाविर्भूतब्रह्मस्वरूपेणतत
त्संवत्सरोजायतेतिश्रुत्याक्रियाशतयात्मककालोत्पत्तिश्रवणात्तस्मिन्ब्रह्मण्येवलये कालंहंतीनाशयतीतितथानामनिर्वचनंयुक्तमितिपश्यामइतिभावः ॐ
कालहंत्र्यैनमः २ कामेशीः काम्यानांभोगपदार्थानांयथादृष्टमीष्टेप्रेरयतीतितथा ॐ कामेश्यैनमः ३ कामितार्थदाकामितानर्थान्ददातीतितथाआत्म
काम आत्मकामइतिश्रुतेः संसारदशायामावृतानंदस्यनामप्रवदवभासमानस्यात्यंतिकसुखात्मिकामुक्तिर्मेस्यादितिकाम्यमानत्वात्मनः कामितश्चासावर्थ
श्चेतितत्स्यैवावज्ञातस्याचार्याभिभावकत्वेन शास्त्रप्रासिद्धपत्तयातंददातीतिप्रयच्छति प्रकाशस्वरूपेणअनुभावयतीतितथा ॐ कामितार्थदायैनमः ४ कामसंजी
वनी कामंमन्मथंपरमेश्वरनेत्राग्निविस्फुलिंगभंडासुरात्मनानेककालदेव लोकविरपक्षंकामशास्त्रप्रयोगसमयेरयतीदेविप्रार्थनांसंधिचीनतदीयपूर्वकालतपयापि

त्रि॰भा॰ रिपाकफलभूतकरुरसपूजितायांगावलोकेनेनसंजीवयतीसप्राणंकृत्वातस्मैवरादिप्रयच्छति तेनतंहर्षयतीतितथा॥ ॐ कामसंजीवन्येनमः ५ कल्याःक
१९ ल्पितुंध्यातुंयोग्या अथवासर्वोत्तमदेवतात्वेनध्यातुंयोग्यातत्कल्पयाः कलेः कामधेनुत्वेनयथावांछार्थकरणं ॐ कल्यायैनमः ६ कठिनस्तनमंडला स्तनयोः
मंडलेआदिमभागोसांतःप्रदेशौकठिनेअप्रकंपेअतिस्थिरेवायस्याः सातथा ॐ कठिनस्तनमंडलायैनमः ७ करभोरुः करभमिवऊरूयस्याः सातथा मणि
बंधादाकनिष्ठं करस्यकरभंबहिरितिभावः ॐ करभोरवेनमः ८ कलानाथमुखी: कलाः चतुःषष्टिनाथयतिप्रेरयतीतिकलानाथः निश्वसितमेवंवेयदृग्वे
दोयजुर्वेदः सामवेदइत्यादिश्रुतेः तादृशंमुखंवदनंअस्यास्तीतितथा कलानाथश्चंद्रइवमुखंअस्याः अस्तीतिवा॰ ॐ कलानाथमुख्येनमः ९ कचजिताबु
दा कचनकेशभारेणकबरेणेत्यर्थः जिताः अपहृताः अंबुदाः मेघाः ययासातथा मेघमंडलावेक्षयाऊर्ध्वगामिशिरोरुहभाराव्योमकेशीतिभावः अथवाकेश
वृत्तिनीलरूपेणवासा दृश्यासहत्वेनधिक्कृताः मेघाः ययासातथा ॐ कचजिताबुदायैनमः १० कटास्यंदिकरुणाः यद्यपिदिनेषुपरिपाल्यताबुधिर्देवानांम
हताकरुणेत्युच्यते तथापितस्याः अंतरत्वेनज्ञायमानतायांतुषुभक्त्यतिशयेनप्रत्यर्थेसेवादौतद्दताज्ञानस्यावश्यकफलदानादिहेतुतयानिश्चेयतदनुरूपक
सात्विकवीक्षणंसंस्मेरसंभाषणादिवत्तंतत्रावश्यभावीति कार्यसत्वप्रसंजितकारणसत्ववत्वात् करुणायाः नवरसेष्वंतर्भावात् रसशब्दस्यचमधुरादौरूढत्वात् १९

तेषामनिर्वचनीयत्वेप्यनुभवगोचरतायामिक्ष्वादिसाधकद्रवपदार्थनिष्ठत्वोपलब्धेः तत्संबंधवशात्परंपरयाद्रवद्रव्यवृत्तिस्यंदनरूपक्रियाश्रयत्वमुपचर्यते त
थाचकटाक्षयोः स्यंदिनीकरुणापरिपालिताबुधिरूपायस्याः सातथा ॐ कटाक्षस्यंदिकरुणायैनमः ११ कपालिप्राणनायिका कपालमस्यास्तीतिकपाली:
आनंदभैरवः तस्यप्राणनायिका प्राणस्येत्युपलक्षणंपंचानांनायकाः अधिष्ठानत्वेसतिप्रेरका नप्राणेननापानेनमर्त्योजीवतिकश्चन इतरेणतुजीवंतियस्मि
न्नेताउपाश्रिताइतिश्रुतेः तस्यापिहृदयांतर्वर्तिपरमेश्वररूपेतियावत् प्राणवल्लभेतिवाप्रियनायिकेतिभावः ॐ कपालप्राणनायिकायैनमः १२ कारुण्यवि
ग्रहा कारुण्यंपूर्वोक्तयाकरुणस्यभावः तत्विग्रहः मूर्तिर्यस्याः सेतितथाकारुण्यस्यात् करणपरिणामबुधिरूपत्वेनेत्रांतवीक्षासस्मेरभावादिनानुमीयमानत्वेपि
साक्षाच्चैतन्यमनोवांछितवरप्रदानादिनाशरीरावयवविशेषजन्यतयाकारुण्यविग्रहोयस्यास्तीतिसमासोपपत्तिः मायोपाधिकस्यब्रह्मणः जगत्सृष्ट्यनुक
रणेहेतुभूतस्वेच्छामात्रनिमित्तककर्माधीनसच्चिदानंदघनीभावात्मकभक्तानुग्राहकविग्रहवत्तां विनादेवतायाबुधावनारोहेसगुणोपासनमनुपपद्यमानंस्यात्
तदर्थदेवताधिकरणेमत्रप्रकाशिताःदेवाः वज्रहस्तःपुरंदरइत्यादिस्वतः प्रमाणवेदवाक्यवशात् बाधकाभावेविग्रहवत्वंतस्यंगीकर्तव्याइतिश्रीसूत्रभाष्यकारा
भ्यांप्रतिष्ठापितंतत्र्यायेनोभाहेमवतामितिकेनोपनिषत्प्रसिध्देहेमानिहेमविकारणिभूषणान्यस्यास्तीतितितथाहिमहतः अपत्यंस्त्रीइतिवातथेतिश्रीभाष्य

कोरेः परदेवतायाः दिव्यविग्रहेवत्वंप्रतिष्ठापितंतथा च महानुभावानांस्वप्रकाशेचैतन्यरूपाणांतमेवभूतानांसर्वोत्तमानांमूर्त्तित्रयतत्कुंडुवादिदेवानांध्यानाद्युप
कारायतादृशमूर्तिवत्वमस्तीतिनकिंचिदनीश्वरवादप्रसंगावकाशइत्यास्तांविस्तरः ॐ कारुण्यविग्रहायेनमः १३ कांताकाशदीप्ताविति धातोः अत्यंतमनोहर
तमित्यर्थः मदनगोपालविग्रहावाकदाचिदिहप्राग्लिताविरुषकृत्यमविहाय वंशनादनिनोदनेकरोतिविवशंजगदितित्रिपुरातापनीये ॐ कांतायेनमः १४ कांति
धूतजपावलिः जपानाजपापुष्पाणांउपलक्षणमन्येषामारक्तवर्णानांवस्तूनामावलिः पंक्तिः दृष्टांतत्वेनकविभिरुत्प्रेक्षिता कांत्याजप्राकृतपरमानंदचिद्र
धुतापरिसक्ताप्राकृतत्वात्यकांतिमतयोपमायोग्यतयाययासाः नहिमहांतोनीचैरुपमीयंतइतिन्यायादितिभावः ॐ कांतिधूतजपावल्येनमः १९ कलात्ल
याकलाचतुःषष्टिकलाआलापः व्यावहारिकः शब्दः यस्याः सातथा वेदशास्त्रमयीवाणीयस्यासापरदेवतेतिवचनात् कलअव्यक्तः मधुरः सप्रयोज
नः अलापः संलापोयस्याः सेतिवातथा अन्यथाभारतितयेति महापुरुषसामुद्रिकवचनात् ॐ कलालापायेनमः १६ कंबुकंठि कंबुशब्देनशंखनिष्ठरे
खात्रयंलक्ष्यतेतद्वान् कंठोयस्याः सेतितथा गौणनामेदं ॐ कंबुकंठ्येनमः १७ करनिर्जितपल्लवा करशब्देनकरतलंलक्ष्यते पल्लवशब्देनतन्निष्ठपारुष्य
स्निग्धतालक्षणयार्थः तथाचान्योन्यंगुणयोर्जयापराजये अर्थातद्वतोरपितौसिद्धावितितत्रानोपपत्तिः विवादश्चविवादश्चसमयोरेवशोभतइतिवचना

त् करतलेतत्साम्यध्वनिरनेननाम्नाकृतः करेणनिर्जिताः पल्लवः यस्याः सातथा ॐ करनिर्जितपल्लवायेनमः १८ कल्पवल्लीसमभुजा यथादिव्यज
वृक्षाः नंदनोद्यानेप्रसिद्धाः तथातदलंकारावल्यास्तयोपिकल्पयंतिसंपादयंतीतिकल्याः कल्पाश्चताः वल्यश्चप्रतसः ताभिः समाः भुजाः हस्ताः यस्याः
सातथा कविसंप्रदायप्राप्तास्त्रीभुजानांवल्लीसाम्यमितिमंतव्यं २ अत्रसमपदस्वारस्यनतेषामपितदवच्छिन्नचैतन्यद्वारायथाप्रारब्धंतेनवत्स्लोकः वांछि
तार्थफलकर्तृत्वमितिध्वनितं एकस्तथासर्वभूतांतरात्मा रूपंरूपंप्रतिरूपोबभूवेतिश्रुतेः तत्तदेवावगछत्वमितिस्मृतेश्च भगवतास्वकीयसच्चिदानंदस्व
रूपावस्थितिरेवोक्ताः अतस्वपरदेवीभुजानानीवसाम्योक्तिशंकानिरस्तावेदितव्या औपाधिकचैतन्येचतया भूतचैतन्यस्यसाम्योपपत्तेः ॐ कल्पवल्ली
समभुजायेनमः १९ कस्तूरीतिलकांचिता कस्तूरीतिलकेनललाटदेशसंस्थापितबिंद्वाकारमृगनाभिनाअंचिता विहिताअलंकृतेत्यर्थः कस्तूरीतिलका
चितायेनमः २० इतिश्रीमत्परमहंसपरिव्राजकाचार्य॰ तृतीयवर्णनामार्थप्रकाशने॰ हकारार्था हकारस्यआकाशबीजस्यअर्थो अर्थस्वरूपचैतन्याका
शविग्रहेत्यर्थः आकाशोहवैनामरूपयोर्निर्वहितातेयदंतराधेतिश्रुतेः ॐ हकारार्थायेनमः १ हंसगतिः हंतिगछतीतिहंसः प्राणआदित्योवाहंसस्यप्रा
णस्यगतिः गमनागमनलक्षणयातज्ज्ञाप्या अजपामात्ररूपायाः तेयस्याः सातथा हकारेणबहिर्यातिसकारेणपुनर्विशेदितिवचनात् तदभिमानीदेवता

रूपाग्नीषामात्मकसूर्यचंद्रगतिजअहोरात्रात्मककालस्वरूपायाः यस्याः सातथा हंतिदेहंदेहंगच्छतिस्वकर्मवशेनेतिहंसोजीवः यस्यगतिः प्राप्यस्थानंमुक्ति
रित्यर्थः ब्रह्मविद्याप्नोतिपरंयज्ज्ञात्वाननिवर्त्ततइतिश्रुतिस्मृतिवचनात् अथवाहंतिस्वकार्यभूतंजगद्विशतीतिहंसः हंसस्तुपरमेश्वरइतिनृसिंहतापनी
येगम्यतेप्राप्यतेशरणत्वेनप्रपद्यतेचतुर्विधभक्तैरितिगतिः हंसश्चासौगतिश्चेतिसामानाधिकरण्येसमासः हंसःशुचिषदितिश्रुतेः अहोस्वित्हंसस्यब्रह्मबा
नस्यगतिरिवगमनंयस्याः सातथाउताहोहंसशब्देननामैकदेशेनहंसकंपादकटकमुच्यते गम्यतेऽनेनेतिगतिः चरणंहंसयुक्तेगती पादारविंदेयस्याः सातथा
हंसशब्देननित्यानित्यसारासारजडाजडादिवस्तुविवेकसामर्थ्याः हंतिगच्छतिप्रतिग्रामंप्रतिदेशमितिहंसः परिव्राजकाः चतुर्थाश्रमिणः निष्कामातेषांगतिः
ज्ञायतेगम्यतेसाक्षात्क्रियतइतिगतिः सन्यासयोगाद्यतयः शुद्धसत्वाइतिश्रुतेः यपूर्वदेवाऋषयश्चतद्विदुस्तेतन्मयाअमृतावैबभूवुरितिश्रुतेः जीवन्मुक्तपुरु
षानुभूयमानपरमानंदमुक्तिस्वरूपेत्यर्थः ॐ हंसगतयेनमः २ हाटकाभरणोज्वलाहाटकस्यसुवर्णस्यकार्याणिचतान्याभरणानिचहाटकाभरणानितैः उ
ज्वलातथाप्रकाशिताअलंकृतेत्यर्थः हाटकस्यस्वर्णरूपस्यब्रह्मांडस्यहाटकत्वात् उज्वलाप्रकाशकरिसत्तास्फूर्तिकरित्यर्थः यद्वाअस्मिन्नाभरणेः मंगल
सूत्रादिभिस्सनाथस्त्रीमंडलस्वरूपेः उज्वतीतिअहोस्वित्कार्यकारणद्वयरूपवसुदानेनवसुस्वरूपेणवाउज्वतिप्रकाशतीतितथावसुरंतरिक्षसदितिश्रुतेःॐ

हाटकाभरणोज्वलायैनमः ३ हारहारिकुचाभोगाहरस्यपरमेश्वरस्यइमेसंबंधिनोहाराः ईश्वरत्वाप्तकामत्वनियंतृत्वादयोगुणाः तान्हरतितद्विपरिता
विद्यायाधानेनउत्सादयतीतिहराहारिकुचायोः अभोगपर्यंतंभूमिर्यस्याः सातथापरमेश्वरस्यतद्विषयकवांछयातदेकसमनत्वेनतत्कारणीभूताविद्यावश
वर्तित्वेनवशीकृतमायत्वरूपेश्वरत्वसमानाधिकरणाप्तकामत्वादध्योंक्ताअपहता जीवेश्वरत्वयोर्नैकत्रतेषांतद्गुणानांचसामानाधिकरण्यायोगादित्यर्थः त
थाचइश्वरस्यमदिष्टसाधनमित्यन्यत्रपदार्थेषुबुद्धिमत्वस्यैवबलुभवनरूपतयातस्यजगदाधारत्वाधायकइत्यधिकगुणवत्तोपेक्षाविषयत्वेनाभोगस्यात्तिश
योक्तिरितिद्रष्टव्यंअथवाहारान्मुक्तास्त्रजः हरतिआदत्तइतिहारहारिकुचाभोगोयस्याः सेतितथाः षट्प्रकारमुक्ताहारेणयथोचितकालंभूषितवतीतिभावः
ॐ हाराहारिकुचाभोगायैनमः ४ हाकिनीहाकयतिजन्ममरणयोः खेदयतीतिहाकिनी हारयेदइतिधातुपाठात् ॐ हाकिन्यैनमः ५ हल्यवर्जितालल्ल
संबंधीहल्यकृष्यादिद्वाराजनकत्वंताद्विर्जिता स्वांतःकरणाविकृतिः तेनवर्जिताअविद्याविरहितातत्त्वपदलक्ष्यार्थभूतत्वादितियावत् ॐ हल्यवर्जितायैनमः ६
हरित्पतिसमाराध्याहरितांदिशांतयः महेंद्रादयः तैःसम्यक्सहाभक्तिपूर्वकंआराधितुंयोग्या तद्विपक्षनिवर्हणेनेष्टप्रापकदेवतात्वादित्यभिसंधिः ॐ हरि
त्पतिसमाराध्यायैनमः ७ हठात्काराहतासुरा हठात्कारेणअतितीक्ष्णतयापराभूताः आसुराः सुरविपक्षाः महिषादयः ययासातथा समबलयोः किल्लो

केसमामुपायः बलाबलविचारणाच्चभवति प्रबलस्यदुर्बलेषुवैरिषुसिंहस्ययेषुविवतद्योगेनात्तित्वरयाविचारेणैवदेवलोकसुखप्रदेत्तिनामार्थीविचा
रणायामित्तरेषुकेमुत्तिकन्यायेनतत्करणंध्वनितमितियोजनीयं ॐ हटात्कारहतासुरायेनमः ८ हर्षप्रदाहर्षोनामानंदकारणः मुखविकासादिकार्योत्र
यः स्वात्मसंभावनेतपरिभवनिमित्तश्चित्तवृत्तिविशेषः कार्यस्यकारणाविनाभावित्तयात्तत्प्रदानत्तधेत्तोरप्याक्षिपतीत्तिसुखप्रदेत्यर्थः प्रददात्तीतिप्रदाअ
थवाहर्षधनयौवनादिसुखपुत्रबंधुवर्गादिरूपेणापरिहत्यप्रकर्षेणदात्तिखंडयतीत्तिवातथा ॐ हर्षप्रदायेनमः ९ हविर्भोक्त्रीः सब्रह्मसशिवेंद्रइतिश्रु
तेः वसुरुद्रादित्याकारेणहवींषियजमानेनअग्नौप्रक्षिप्तानिस्वाहाभुखेनभुक्तइत्तितथा यद्वाहवींषिकालांतरभाविकैफलान्य दृष्टात्मनासूक्ष्मरूपाणित्त
घमानजीवगत्तानिभूतसूक्ष्माभिधानानिसमष्टिव्यष्ट्यात्मनेश्वरजीवोपाधिभूतानिमायाविद्याशब्दितानिमुक्तिपर्यंतंभुंक्तेपालयत्तिरक्षतीत्तिवातथाअन्यथा
संसारस्यअनादिभावेनादिमशरीराद्युत्पत्तौक्रियमाणाभ्यांप्रपंचस्याकस्मिकत्वंकृत्ताभ्यागमप्रसंगश्चनस्यादित्तिभावः ॐ हविर्भोक्त्र्येनमः १० ॐ हार्दसंतम
सापहा हृदयावछिन्न हार्दः योवेदनिहित्तंगुहायामित्तिश्रुतेः यस्मिन्नयत्संतमसंआवरकत्वात्तमआसीदित्तिश्रुत्याचात्मविषयकत्तदाश्रयज्ञानमनर्थकारि
अव्याकृताकाशमित्युच्यते महावाक्यश्रवणजन्यधीवृत्तिप्रतिफलिताकारेणापहंतीतितथा नाहंब्रह्मास्मिसंसारीब्रह्मनास्तिनभातीत्यज्ञानस्यात्वंब्रह्मा

स्मियच्चिदानंदलक्षणमित्येकाकारवृत्तिवध्यत्वनियमेनबाधाधिष्ठानेनेहनानेतिश्रुतिसिद्धब्रह्मरूपेत्तियावत् ॐ हार्दसंतमसापहायेनमः ११ हल्लीसलास्य
संतुष्टा हल्लीसैः चित्तदंडैःकुमारिकाभिः एकतालादियुक्तगीतिपूर्वकंयल्लास्यंनर्तनंतस्मिन्संतुष्टाप्रीतिमतीत्यर्थः ॐ हल्लीसलास्यसंतुष्टायेनमः १२ हंसमं
त्रार्थरूपिणीः हंसैः परमहंसैः उपास्योयोमंत्रः प्रणवः शास्त्रचोदितत्वात्तस्यअर्थरूपिणी वाच्यलक्ष्यार्थस्वरूपेणज्ञायमानेत्यर्थः अथवाहंसमंत्रः अजपाहिं
कारसाकारशोधितत्वंपदार्थेहंकारस्यापरोक्षवाचिनः सकारसात्तादृशस्यचभागत्यागलक्षणतयानिष्पन्ननित्यशुद्धबुद्धमुक्तसच्चिदानंदस्वरूपेत्यर्थः ॐ
हंसमंत्रार्थरूपिण्येनमः १३ हानोपादाननिर्मुक्ता अनिष्टसाधनेहानंपरित्यागक्रियाइष्टसाधनेउपानंस्वीकारक्रियापरिजिहीषाआदित्सावा अप्राणो
ह्यमनाःशुभ्रः अकायेनिष्क्रियंअशरीरंवावसंतंनप्रियाप्रियेस्पृशत्तइतिबहुश्रुतेराशरीरस्यब्रह्मणः करणधर्माणांसंभवताभ्यांनिर्मुक्तः असंगेत्यर्थः वि
मुक्तश्चविमुच्यतइत्तिश्रुतेः ॐ हानोपादाननिर्मुक्तायेनमः १४ हर्षिणी एषह्येवानंदयात्तीत्तिश्रुतेः हर्षयतिसंतोषयत्तीत्तिश्रुतेः ॐ हर्षिण्येनमः १५ हरिसो
दरीहरिणा क्षेमेनसमानंएकंउदरंउत इषत् अरंभेदकंअवच्छेदकमित्यर्थः उच्चैदरंकपटंवातत्पल्यमिथ्याभूतमायोपाधिकंचैतन्यावस्थाविशेषरूपाःअ
परेयमित्तस्त्वन्यांप्रकृतिंविद्धिमेपरांजीवभूतांमहाबाहोययेदंधार्यतेजगत् देवात्मशक्तिंस्वगुणैर्निगूढामित्यादिश्रुतिस्मृतिभ्यामीश्वरस्यरूपभेदत्वाव

त्रि०भा० गमादितिमंतव्यंॐ हरिसोदर्यैनमः १६ हाहाहूहूमुखस्तुत्या हाहाहूहूः इतिनामवंतौगंधर्वमुख्यौ येषांजनानांतैस्तथोक्तैस्तुत्यागुणिनिष्ठगुणाभिधानं
२२ स्तुतिः तदाश्रयत्वेनप्रतिपादनीयेत्यर्थः ॐ हाहाहूहूमुखस्तुत्यायैनमः १७ हानिवृद्धिविवर्जिता अवयवोपचयरूपावृद्धिः तदवयवरूपाहानिः ताभ्यावि
वर्जिताः नेवर्धतेकर्मणानोकनीयानीतिश्रुतिः उपलक्षणषड्भावविकाराणांशरीरधर्मत्वेनकर्मनिमित्तत्वादीश्वरेतदभावेननिर्विकारेत्यर्थः ॐ हानिवृद्धिवि
वर्जितायैनमः १८ हय्यंगवीनहृदया हय्यंगवीनंनवनीतसदृशविरलमृदुत्वपरिणामद्रवत्वसादृश्ययोगिहृदयकृपारसरूपपरिणामवतीसाहृदयाभावेपिस
वर्त्मिकतयातदुक्तंईक्षणादिवन्मायापरिणामरूपादयावाहृदयशब्देनोच्यतेअनागमइतिश्रुत्यासर्वनिषेधात्‌ ॐ हय्यंगवीनहृदयायैनमः १९ हरिगोपारुणां
शुकाहरिगोपः इंद्रगोपः आ नक्षत्रेवर्षासुन्दावाः अष्टपादाः रक्तवर्णाः मृदंगाः कीटविशेषाः यथाषोणमंशुकंअवरंस्वार्थेप्रकल्पयेकिरिरणानिवायस्याः
सातथा ॐ हरिगोपारुणांशुकायैनमः २० इतिश्रीमत्परमहंस० चतुर्थवर्णनामार्थप्रकाने लकाराख्या लकारयुक्तमूलमंत्रः अख्यावाचिकाशब्दयस्याः
सातथाल्ककारस्यशक्तबीजस्यवार्थः सेंद्रइतिश्रुतेः लकारयुक्तस्यमायाबीजस्यवास्तव्यमायेत्यर्थः ॐ लकाराख्यायैनमः १ लतापूज्यालवंतीवीनमंतिमत्यं
तेनम्राभवंतीतिलताः परमपतिव्रताअरुंधत्यादिस्त्रियाः ताभिः स्थिरमांगल्यायस्वेष्टदेवतात्वेनपुज्यापूजनीया तदुक्तंसमाराध्यमहेशानीभुक्तिमुक्तिंचविंदति २२

अथवाकेदारादिगौरविशेषमूर्त्तेर्लताभिः उपलक्षणं वन्य० पूज्योपकरणैः पूज्याअलंकृताशबरीवानवदुर्गावेतिभावः ॐ लतापूज्यायैनमः २ लयस्थि
त्युद्भवेश्वरीवैपरीत्येनविशेषणयोऽयं उद्भवतीत्युद्भवः कार्यत्मनाभिव्यक्तिः स्थितिः ज्ञानविषयतायोग्यकालअवच्छेदः अनुभवहेतुसत्ताकत्वमितिया
वत्‌ प्रलयः उत्पन्नकार्यस्यकार्यात्मिनावस्थितिः वाचारंभणाअयोग्यत्यर्थः यासंक्रियाणांचेतनदर्शनातादृशानानीश्वरत्वंवेतिविषये यतोवाइमानिभूता
निजायंतइतिश्रुत्तेोयतइत्येकवचनंपंचम्यानानात्वतटस्थत्वे कर्तुः कृतिरितिसूत्रंजनिकर्तुः कार्यस्यकृतिः प्रकृतिः उपादानंअपादानसंज्ञः स्यात्‌ अपादानेपं
चमीतिशासनादभिन्ननिमित्तोपादनत्वमीश्वरीत्वमिति सिद्धांतः तटस्थलक्षणमेतज्ज्ञायमानस्यब्रह्मणः लक्षणप्रमाणयोरवश्यवाच्यत्वादित्यभिप्रायः आद्य
यलशब्दापादनेनादित्वप्रपंच्यसूचितंजगतइतिशब्दपुराणेननामयोजनीयं तथाचजगतः लयश्चस्थितिश्चउद्भवश्चैतेषामीश्वरीः कूटस्थचैतन्यमात्रेणस
च्चिदानंदाधायकतयाविवर्त्तकारणमित्यर्थः ॐ लयस्थित्युद्भवेश्वर्यैनमः ३ लास्यदर्शनसंतुष्टायथाराजासंपूर्णवकामप्रयोजनमुद्दिश्यापिमृगयालीलावि
शेषानुपश्यति बालकादिनृत्यंवातथाअज्ञानांइष्टानिष्टमित्रोदासीनपदार्थचतुष्टयानुभवजन्यहर्षशोकादिसंभवंमदोद्रेकशोकातिरेकहेतुकविहितादिकेर
यद्रूपचरणाद्यंगपरिस्पंदरूपनानाविधप्राणिकाधनिकाधजन्यलास्यस्यदर्शनेन अनुदिश्यापिप्रयोजनसंतुष्टाः ततकर्मानुसारेणफलप्रापकेश्वरतयास

वंसमानत्वात् नादत्तेकस्यचित्पापंनचैवसुकृतंविभुरितिभगवद्वचनात् हास्यंदेवतादिवारवनिताभिः क्रियमाणंतालगीतियुक्तंनृत्यंतस्यदर्शनेनसंतुष्टात्तदीय
फलप्रदानोन्मुखस्मारसवतीत्यर्थः ॐ हास्यदर्शनसंतुष्टायैनमः ४ लाभालाभविवर्जिताअप्राप्तप्राप्तिर्लाभः कृतेपियत्नतदप्राप्तिः ताभ्यांवर्जिता॰ पर्याप्तकामत्वे
ननित्यतृप्तत्वात् नमेपार्थास्तिकर्त्तव्यं त्रिषुलोकेषुकिंचनेतिभगवद्वचनात् ॐ लाभालाभवर्जितायैनमः ५ लंघ्येतराज्ञाः इतरेषांजीवभ्रांतिकल्पितानांगुणमू
र्त्यादीनामुपासनविधिरूपावाकर्मविधिरूपावाआज्ञाप्रेरणालंघ्याअविषयीकृतायया सातथाशुद्धचैतन्यस्यविषवित्रियात्म्यात्मकत्वाभावेनविध्यविषय
त्वादितियावत् अथवाकिंकरीत्वाभावेनेतरेषांदेवानामाज्ञाप्रेरणालंघ्योपेक्षणीयायया सातथा सर्वस्याधिपतिः सर्वस्येशानइतिश्रुतेः ईश्वरस्यसर्वनियं
तृत्वेनघोतराजनियम्यत्वादितिज्ञातव्यंअलं ॐ अलंघ्येतराज्ञायैनमः ६ लावण्यशालिनी लावण्यंसौंदर्यंपरमानंदस्वरूपतयाअतिशयितप्रीतिविष
यित्वंशालत्वाइतितथा सर्वावयवसाधरणसुंदरभाववतीतिवा॰ ॐ लावण्यशालिन्यैनमः ७ लघुसिद्धिदालघुनाउपायेनसिद्धिंवांछितार्थप्राप्तिंददाती
तितथा लघुशब्दः लक्षणयालघिमापदः तथाचलघिमाद्यष्टैश्वर्यप्रदेतिवा अथवालघुनाअत्यंताल्पभाग्यशरीररूपचरणवतामपिअतिनिकृष्टानांतिर्य
गादिनामपिसिद्धिमुक्तियोग्यताहेतुज्ञानादिसाधनसंपत्तिंतत्कार्यमहिमातिशयोन्नेयादद्दातीतिसातथा ॐ लघुसिद्धिदायैनमः ८ लाक्षारससवर्णाभा २४

लाक्षारसेनलक्तिकाद्रवेणसमानोवर्णोयस्याः सातथाभूताआकांतिर्यस्याः सातथा अतिपाटलविग्रहप्रभेत्यर्थः ॐ लाक्षारससवर्णाभायैनमः ९ लक्ष्मणा
ग्रजपूजिताअग्रेजायतेइत्यग्रजो रामभरतौ लक्ष्मणस्यापिज्येष्ठभूतरामानुचरानुकारित्वेनचतुर्भिरपिदाशरथीभिः पूजितेत्यर्थः रामस्यशिवलिंगप्रति
ष्ठेतितीनामत्वान्यथानुपपत्याशिवदंपतीपूजाकृत्वेतदितरेषांतद्वंशस्त्रीपुरुषाणांतद्विधिरितिफलितोर्थः ॐ लक्ष्मणाग्रजपूजितायैनमः १० लभ्येतरालभ्या
निलब्धव्यानिकर्मोपासनाविशेषाणांफलत्वेनसाध्यानिभव्यानीत्यर्थः तेभ्यइतराविलक्षणा तत्सत्यंसआत्मानित्योनित्यानांचेतनश्चेतनानामेकोबहूनांयोवि
ददातीकामान् तमात्मस्थमितियत्साक्षादपरोक्षात्ब्रह्मेत्यादिश्रुतिभ्यः आत्मनः नित्यत्वस्वरूपत्वेनप्राप्याप्राप्यरूपतयामोक्षरूपत्वेनचतुर्विधक्रियाफ
लत्वाभावादितिमंतव्यं अथवा इतराणिधर्मार्थकामरूपत्रिवर्गरूपाणिफलानिलब्धव्यानिप्राप्तव्यानियस्याः सकाशादितिसातथा उक्तश्रुतेः ॐ लभ्येतरायैन
मः ११ लब्धभक्तिसुलभा भक्तिसामान्यविशेषाकारेणद्विविधातत्राद्याआर्तजिज्ञास्वर्थार्थिभिः यैर्लभ्या ततत्फलोद्देशेनसमयविशेषविच्छिन्नविच्छिन्नप्राप्तस्ते
षांसुलभा॰ ततत्प्रारब्धानुसारेणफलदानोन्मुखोवात्मरूपतयासन्निहितत्वात् द्वितीयाभक्तिस्तुब्रह्मसाक्षात्कारवतापुरुषेणयैनैकभक्तितयालब्धाएकभक्ति
र्विशिष्यतइतिस्मृतेः तस्यसुलभा स्वात्मरूपत्तयासदाज्ञायमानत्वात् ज्ञानित्वात्मैवमेमतमितिगीतासुअथवा॰ लब्धाप्राप्तिस्त्यपिकंठगतचामीकरवल्लब्ध

त्रि॰भा॰ भक्तिनासुलभासुखेनअनायासेनकष्टेनविनाअसाध्यतयाल्लाभः प्राप्तिर्यस्याः सातथा भक्त्यामामभिजानातीतिस्मृतेः ॐ लब्धभक्तिसुलभायैनमः १२
२५ लांगलायुधाः शेषरूपतयाहलायुधेत्यर्थः अनंतश्चास्मिनागानामितिभगवदुक्तेः ॐ लांगलायुधायैनमः १३ लग्नचामरहस्तश्रीशारदापरिवीजिताः
लग्नौकरसंबधौधृतावित्यर्थः लग्नेचामरेययोस्तौतादृशौहस्तौययोस्तेस्तेश्रीश्चमहालक्ष्मीः शारदाचेततथाभूतेचतेताभ्यांपरिवीजिता अनादिकाल
दारभ्यपरिचर्ययावीज्यमानेत्यर्थः ॐ लग्नचामरहस्तश्रीशारदापरिवीजितायैनमः १४ लज्जापदसमाराध्या लज्जानामअंतःकरण्यधर्मजिगुप्साहे
तुः गुहनसाधनमुपलक्षणं मनोधर्माणांतस्यपदंआश्रयः कामः संकल्पोविचिकित्साश्रद्धाधृतीह्रीर्धीर्भीरित्येतत्सर्वंमनएवेतिश्रुतेः तस्मिन्समाराध्या
चिंतनीयेत्यर्थः यआत्मनितिष्ठन्अंतरोयमय गुहातितंगुह्वरेष्ठं तयासस्तंयेनुपश्यंतीतिश्रुतिभ्यः अथवालज्जापदंजीवचक्रंतस्मिन्तदधिष्ठानंने
दाभिव्यक्तिहेतुतयाबहिर्यागक्रमेणपूजनीयेत्यर्थः ॐ लज्जापदसमाराध्यायैनमः १५ लंपटालमितिपृथिवीवाचकबीजेनतदुपलक्षितंजगल्लक्ष्यते य
पटशब्देनआवरकत्वधर्मवतयाअविद्यालक्ष्यते लमंतःजगतः पटकारणीभूताअविद्यायस्याः सातथा मायिनंतुमहेश्वरं एकैकोजालवानित्यादिश्रुतेः २५
अज्ञानेनावृतंज्ञानमितिस्मृतेश्च अथवालंपटोनामतंद्रिआलस्यंकर्मोपासनाबाहुल्येपिप्रतिबंधकमूयस्वशीघ्रतयापरमेश्वरस्यफलदानानुत्सुकता

यांराजादिवच्चिरविलंबितसेवाफलदानवैमुख्येतद्वत्योपचाराल्लंपटायस्याः सातथा अथवालंपटादिनामतः करणधर्माणामध्यासवशेनतदवच्छिन्नचै
तन्येसत्वरजस्तमःकार्याणामुपलब्धेस्तद्वत्ॐ लंपटायैनमः १६ लकुलेश्वरीकुः पृथिव्युपलक्षितजगल्लीयतेस्मिन्नितिकुलंमायोपाधिकेचैतन्य जग
त्सल्याधिष्ठानंयत्प्रयंत्यभिसंविशंतीतिश्रुतेः लियमानंकुलंअकुलंनिरुपाधिकमित्यर्थः तच्चसाइश्वरीचासातथा लकुलंस्थानविशेषः स्वाधिष्ठानम
णिपूरकंवातस्येश्वरीविष्णुरुद्रात्मिकेत्यर्थः भूतसृष्टिश्रुतोपृथ्व्याः उदकेतस्यतेजसीतस्यपरमात्मनीलयश्रवणात् सदायतनयनः सप्रतिष्ठाइतिविष्णु
तिविशेषावा ॐ लकुलेश्वर्यैनमः १७ लब्धमानाः सर्वैःप्राणिभिःलब्धाः मानाः अध्यस्ताहंकारः अभिमानात्मकस्तेष्वहंकाराः प्रकीर्तिताइतिस्मरणा
त् अध्यासेनाहंकाराधिष्ठानेत्यर्थः अथवामानपूजायामितिस्मरणात् यैःप्राणिभिः विद्येश्वर्यकुलसौंदर्यातिवशात् पूजालभ्यतेसुखहेतुःसातदंतर्या
मिणापूर्वमेवलब्धापूजादिजन्योपकारस्यमुखादेः स्वस्वरूपतयालब्धत्वात् यद्वामानः परिमाणः अणुर्महद्दीर्घन्हस्वभेदेनप्रसिद्धः सवाएषमहानजआ
त्मामहान्प्रभुर्वैपुरुषः अणोरणीयान्महतोमहीयान् इत्यादिवेदवाक्यैः जलसूर्यादिवदुपाधिधर्माणामुपहितेगजस्तंबम गसपदेप्रतीयमानत्वा
त् लब्धमाणःपरिमाणःउपहिततयाजगतःययासातथा ॐ लब्धमाणायैनमः १८ लब्धरसारसोवैरसःइतिश्रुतेः रसवद्दृश्यत्तेसंबध्यतइति प्री

तिविषयः आनंदः सः स्वस्वरूपत्वेन लब्धोययासात्तथा श्टंकाररसोवातद्यंजनमंगलाभरणपुष्पालंकारवस्त्रादिभावः शुद्धसत्वप्रधानमायोपाधिकतयारस्याः
स्निग्धास्थिराहृद्याआहाराः सात्विकप्रियाइतिगीतावचनात् नैवेद्यादौकट्वम्ललवणादीन्दिवादिविषयेनिषिद्धाश्वप्रीतिविषयत्वेन मधुररसः लब्धोययेतिवा
सात्तथा ॐ लब्धरसायैनमः १९ लब्धसंपत्समुन्नतिः लब्धास्वस्वरूपतयास्वतःसिद्धयासंपदः सत्यकामादयः सच्चिदानंदादयोवाताभिः समुन्नतिः सर्वो
त्कृष्टतायस्याः सेतितथा ब्रह्मणः मायामात्रोपाधिनाभिव्यंजमानाः गुणाः कर्मानुद्भूतत्वानाकस्मिकाः संतः सर्वोत्कृष्टभावंब्रह्मणः ज्ञापयतीतमिश्वराणां
परमंमहेश्वरंतंदेवतानांपरमंचदैवतः पतिःपतीनांपरमंपरस्ताद्विदामदेवंभुवनेशमीड्यं सत्यकामः सत्यसंकल्पएषसर्वेश्वरएषसर्वज्ञएषांतयाम्येषयोनिः
सर्वस्येतिगतिर्भितप्रभुः साक्षादित्यादिश्रुतिस्मृतिशतेभ्यः एषनित्योमहिमाब्राह्मणस्पतेः श्रुतिसिद्धनिरतिशयोत्कर्षवत्वंब्रह्मस्वरूपभूतमेवेतिनात्रविचारणी
यं किंचिदस्तीत्यभिप्रायः ॐ लब्धसंपत्समुन्नत्यैनमः २० इतिश्री॰ पंचमचरणनामार्थप्रकाशनं॰ ह्रींकारिणी ह्रींकारः द्वितीयखंडसमाप्तवयवत्तया
वाच्यवाचकसंबंधेनयस्यास्तीतितथा ॐ ह्रींकारिण्यैनमः १ ह्रींकाराद्या अत्रह्रींकारशब्देनतत्कार्यभूताः वेदाः तेषामप्यर्थविषयकत्वेनप्रवृत्तेः शक्तिग्रा
हकाव्यादिकृतोचार्थज्ञानपूर्वकशब्दसंयोगदर्शनादर्थस्यपूर्वभावित्वमुक्तमितिभावः ॐ ह्रींकाराद्यायैनमः २ ह्रींमध्या अस्यविजयस्यजगदभिन्नानि २६

मित्तोपादानभूतमायाविशिष्टचैतन्यवाचकतयातस्मीतिकत्वेनतन्निष्ठयावद्गुणवत्त्वंतदुपासनातिशयमहिम्नाभिव्यज्यते अथन्यामंत्रपुरश्चर्ययास्वेष्ट
सिद्धभावप्रसंगःस्यात् अव्यवहितपूर्वनाम्नानभिव्यक्तरूपस्यापिशब्दजालस्यएतद्बीजमात्रात्मनैषादंकुरितबीजार्थतयापूर्वभावित्वमुक्तं इदानीमभि
व्यक्तात्मस्वार्थकतयाविवर्त्ततयावाश्रुत्याचाचारंभणाकारेणनामरूपद्वयवत्वमुच्यते श्रीबीजार्थाः तेनशब्देनलक्ष्यंते मध्येव्यवहारकाले ह्रीयस्याः सात्तथा
घटादिषुवस्तुषुसच्चिदानंदप्रतीत्याव्यवहारकालेऽपिप्रपंचकारणंब्रह्मानुस्यूतत्तयाभासनंजगत्कारणमितिसिद्धांतः अनेनाचेतनपरिणामारंभादिवादः
निष्क्रमाणत्तयायुक्त्याप्याभासचित्ताभरणापेक्षयातद्विजातीयप्रकाशसत्ताश्रयत्वात् उत्तमांगस्थानविषयस्थापितमहदैश्वर्यवत्वेननिरस्तावेदितव्यं
ॐ ह्रींमध्यायैनमः ३ ह्रींशिखामणिः लोकेयथाचूडामणिः सर्वांगरहितदत्तःपुरुषस्यज्ञापयतितथासर्वशब्दजालतद्वाच्यार्थः भूतद्विज्जडसंबंधस्वरूप
प्रपंचत्वविवाचकातिसूक्ष्म ह्रींवर्णात्मकश्रीविद्याराजबीजस्यसत्यज्ञानानंदात्मकलक्ष्यार्थभूताह्रींबीजजापकानासर्वार्थप्रदानेनपारमैश्वर्यंव्यंजयतीति
गुणयोगकृतनामेदं तथाचह्रीमः शिखामणिःपरमतात्पर्येणज्ञापनीयेत्यर्थः ॐ ह्रींशिखामण्यैनमः ४ ह्रींकारकुंडाग्निशिखा ह्रींकारएवकुंडंवाच्यवा
चकभावसंबंधेनपरब्रह्मावच्छेदकतयाआहवनीयादिसादृश्यं तस्याग्निशिखाउद्दीसग्नोजुहोतीतिप्रमाणेनाहवनीयेजुहोतीतिविधिवाक्यगतहोमाधार

त्रि॰भा॰ तयाकेवलाहवनीयस्यायोग्यतया साग्निज्वालस्य तस्यहोमाधारतायां ज्ञायमानायां अदृष्टद्वारास्वर्गसंबंधेनसार्थकत्तयातज्ज्ञापकस्यवेदवाक्यस्यापिपुरुषार्थ
२७ संबंधित्वमाहवनीयनिष्ठहोमाधिकरणदीसाग्निज्वालस्याधारभूतकुंडसार्थक्यसंपादकेचाभाति॰ तथास्ववाचकबीजस्यापिमंत्रैरूपासीतेतिविधिगतदेवतोपा
सनकुर्यंत्ति मंत्राणामपिस्ववाचकत्तयासार्थस्यसंपादनात तथोच्यते ॐ फ्रींकारकुंडाग्निशिखायैनमः ५ फ्रींकारशशिचंद्रिका फ्रींकारएवशशिचंद्रः तस्यस्वरू
पाभिदभूत्तप्रकाशकेचेतन्यंचंद्रिकापदेनोपमीयते यथाचंद्रस्वरूपभूतामृतप्रसारभूताज्योत्स्नादेवादिसर्वलोकानां संजीवनतया उपकरोति॰ तथाहृढतरभक्तिपरे
वशपुरुषधौरेयादिनां फ्रींकारवाच्यार्थतयातदभिन्नत्वेपिजगद्विवर्त्तकारणतयासच्चिदानंदाधायकत्वेनसंजीवयतीतिभातिवा॰ ॐ फ्रींकारशशिचंद्रिकायैनमः ६
फ्रींकारभास्कररुचिः भासः कांतीः करोतिप्रसारयत्तिलोकोपकारायेति तथासूर्यः तस्यरुचिः प्रचंडभानुः यथालोकेसूर्यः वर्षास्वितिगाढतरमेघवदुदककरासं
व्याप्तदिगंतरासुदिवा विद्यमानोपिसूर्यः साक्षादयमितिचाक्षुषज्ञानगोचरोनभवतितदभावेशिष्टानांभोजनादिसंजीवकव्यवहाराभावेनतदुपायासि
ध्याजप्रसन्नमृनासिभवंति तथाज्ञानमार्गानधिकारिणांमोक्षमार्गोपायभूताविदितदेवतारूपफ्रींकाराणांजनानांबहुतरलावण्यमहिम्नामहावातेनेवमे
घावरणैदुरिकृत्तायांचंडभानुरिवसुखसाधनं गुरुकृपायांगावलोकेनरूपदीक्षावशेनप्रतिबंधकदुरितापगमेपरमेपरदेवतारूपः फ्रींकारः पुरश्चर्ययासा २७

क्षाद्वाच्यार्थपरोक्षज्ञानेहेतुर्भवति चिरकालेनिरंतर्यभावनाप्रकर्षेणतस्मिन्नभिमुखेसतितल्लक्ष्यार्थरूपापरमानंदचित्कलास्वयमेवाभिव्यक्तासत्यानंदानुभ
वामृतेनसुखयतीति तथोच्यते ॐ फ्रींकारभास्कररुचयेनमः ७ फ्रींकारांभोदचंचला अंभांसिअमृतानिददतीत्यंभोदाः फ्रींकारोपिकामवर्षित्वेनतेरुपमीय
ते तेषुचंचला॰ विद्युल्लताविद्यमानातदभिन्नाप्रकाशमानासत्तिवर्षोदकद्वारासस्याद्युत्पादकत्वंयथाव्यनक्ति॰ फ्रींकारवाच्यतयातदभिन्नापितत्स्वरूपविचार
णायां शुद्धलक्ष्यार्थस्वरूपासत्यप्यनिर्वचनीयस्यवाचकमंत्रप्रकाशितदेवतात्वेनस्वाभीष्टपुरुषार्थप्राप्तिहेतुभूतत्वभिसंधिः ॐ फ्रींकारांभोदचंचलायैनमः ८
फ्रींकारकंदाकुरिकायेनमः ९ फ्रींकारएवकंदः दृढतरबीजभारः तस्यअंकुरिकाआदिप्रसवः नूतनाभिव्यक्तिरित्यर्थः तथालोकेअंकुरादिकंकंदादिनिष्टत्वा
दकशक्तिमताभिभूयेवस्वयंकंदशाखपत्रपुष्पफलाद्यात्मनायथाविवर्त्तमानेतत्सामर्थ्यप्रकटनकारणंभवति फ्रींकारस्यवेदैकदेशत्वेनेतरप्रमाणानपेक्षतया
स्ववाच्यार्थज्ञापनेनस्वतः प्रामाण्यस्थितेपितज्जन्यज्ञानविषयतावच्छेदकधर्मरूपनानाप्रकारजगत्परिणामहेतुत्वसाधिका अघटितघटनापटीयसीमायो
पाधिकत्वेनतदर्थद्वयरूपासत्तितन्मात्रप्रमाणवेद्येत्यर्थः ॐ क फ्रींकारकंदाकुरिकायेनमः ९ फ्रींकारैकपरायणा फ्रींकारएवैकं अनियतसाधारणं चतुर्विध
पुरुषार्थसाधकतयापरंअयनंज्ञापकंप्रमाणंयस्याः सातथा अस्यबीजस्यवाच्यार्थोमायासानिरधिष्ठानानसिध्यतीतितदाश्रयत्वविषयत्वाभ्यांतदुपहितं

तेनज्ञाप्यत इतिभावः ॐ फ्रींकारैकपरायणायेनमः १० फ्रींकारदीर्घिकाहंसी फ्रींकार एव दीर्घिका राजोद्यानवनक्रिडावापिः संसारकाननसंचारिलोकविश्रां

तिकारणत्वेन फ्रींकारः तयाउपमीयते आराममस्यपश्यंतिकश्चनेतिश्रुतेः असमंतद्रुमंत्यस्मिन्निस्यारामोवाजगत् तत्रोपासनादिना परमानंदप्रापकतयावा फ्रीं
कारः उपमीयते तस्मिन्हंसोस्त्रीहंसः यथालोके सारासारविवेकिहंस्याधारसुवर्ण कमलादिमतीव्यापिका महाराजसंबंधिनीतिज्ञायते तद्वद्वाच्यार्थरूपतयात्र
काशमानासत्तिस्वसंबंधिबीजस्यसुखोत्पादकत्वंमोक्षहेतुत्वंद्योतयतीत्यभिप्रायः ॐ फ्रींकारदीर्घिकाहंस्येनमः ११ फ्रींकारोद्यानकेकिनी फ्रींकार एवउद्या
नंवत्फलानभावकत्वात् तथोच्यते तस्यकेकिनीमयूरीयथालोकेबहुपक्षिष्वारण्यकेषुसत्स्वपितस्याः रूपध्वनिभ्यांसुष्ठुतयादर्शनश्रवणादिजन्यप्रमोदसाध
कतयोद्यानालंकारित्वमुक्तंतथाफ्रींकाररूपदेवताध्वनेः सच्चिदानंदरूपतद्वाच्यार्थस्यचपरमपुरुषार्थसाधकत्वेनविशिष्टत्वेपिब्रह्मविष्णुरुद्राग्न्यादिमूर्त्ति
ष्युद्यानतरुवल्लिकस्सगुल्मादिवदुत्तमनीचत्तापत्रंदेवतिर्यङ्मनुष्यादिषुचमयूरिवत्त्वेच्छयासर्वव्यापकत्वेनतदात्मस्तत्तयाशरीरेंद्रियप्राणाद्याधारपरमप्रमा
स्पदपरमानंदरूपगोचराहेत्तिव्योप्यत्तयाएतद्बीजप्रकाश्याइत्यर्थः ॐ फ्रींकारोद्यानकेकिन्येनमः १२ फ्रींकारारण्यहरिणी फ्रींकारैस्यारण्योपमित्वंतथा
चार १+ वाच्यार्थैकदेशभूतमायाविद्यातत्कार्यणांबंधरूपत्तयागहनेव्याघ्रादिनामिवभयहेतूनांसन्दावेनदुःप्रेक्ष्यत्वरूपधर्मसाम्येनफ्रींकार+ ण्यमि २८

वत्फ्रींकारइतिसर्वतोपमानोंतरयदयंसमासः तेत्रवसत्तियथारण्यगतपुरुषस्यशीघ्रंदृष्टिपथंगताहरिणीएणीव्याघ्रस्याभावनिश्चयेनतदधिगमफलप्राप्ति
साधनतामपगमयत्तिधीरपुरुषस्यतथानिरंतरभक्तिभजनपरप्राणिलोकस्योपासनापरिपाकमहिम्नापरोक्षीकृताअज्ञाननिवृत्तिपूर्वकंभयायकरणेना
नंदंप्रापयतीतितयोपमित्तेतिभावः तमेवविदित्वापमृत्युमेत्तीतिश्रुतेः ॐ फ्रींकारारण्यहरिण्येनमः १३ फ्रींकारावालवल्लरी फ्रींकारमंत्रवाचकतानिरूपित्तवा
च्यतानामकसंबंधावच्छिन्नपरदेवत्तास्वरूपत्वेनतदुपासनाविषयफलदानसमर्था सतिअवालमात्रप्ररोहविरहवल्ल्योपमीयतेतथाचतत्संबंधितयाफ्रींकारः
जायादिनावालइवसर्वदासंरक्षणीयइतितात्पर्यार्थः परिनिष्पन्नइतियावत् ॐ फ्रींकारावालवल्ल्यैनमः १४ फ्रींकारपंजरशुकिमंदाधिकारिणामप्युपास
नकरणसाधारणपार्वतीप्रतीकया फ्रींकारस्यबालकादिनाचित्तरंजनी एवंतत्तदृष्टानुसारेणफलदात्रीसतितयोपमित्तेतिद्रष्टव्यं फ्रींकारः पंजरमिवत्तस्य
शुकित्तत्सामर्थ्यकारिणीत्यभिप्रायः ॐ फ्रींकारपंजरशुक्येनमः १५ फ्रींकारागनदीपिका अगणवत्सर्वसाधारणभ्रांतिस्थानतयाफ्रींकारस्यतदुपमा॰ त
स्यदीपिका यथांगणारोपितदीपः बाह्याभ्यंत्तरवस्तुजातंप्रकाशयन् तत्रस्थलोकानामंधकारादिनिवर्त्तनपूर्वकमभीष्टव्यवहारहेतुतयासर्वान्म्लापयत्तिस्व
यमपित्तैः संरक्ष्यते॰ तथाफ्रींकारबीजार्थश्रवणमनननिदिध्यासननिरंतराध्यासादपरोक्षीकृतस्वयंप्रकाशानंदरूपाणिस्वसेवकायसर्वोत्कर्षयत्तितदुपमिता

 सतीतथोच्यते ॐ ह्रींकारांगणदीपिकायैनमः १६ ह्रींकारकंदरासिंहीपर्वतशिखराग्रवर्तीगुहाकंदरादरित्यर्थः वेदमौलिपठितह्रींकारस्यग्राम्यविषय
 लिप्सुप्राणिप्रवेशयोग्यताविकलतयाकंदरोपमातत्रहिसिंहस्वेतरक्षुद्रमृगप्रवेशजयहेतुसत्वादिस्वव्याप्यविक्रमानुमितातत्श्रेयायमात्रताधीरस्यतत्वरि
सरनखनिर्धूतमुक्तादिप्राप्तिंचनयति तथामंदभक्तितंद्रिभुभुक्षादिकलुषितपरिच्छिन्नाभिमानदेवतांतराप्रतिपादकबीजतया स्वदेवैतेकामितार्थंच
प्रापयतीतिसिंहयुपमितासत्ति तथोच्यते ॐ ह्रींकारकंदरासिंह्येनमः १७ ह्रींकाराबुजभृंगिका ह्रींकारस्याष्टैश्वर्यात्मकपुरुषार्थसाधकनानाशक्तिवत्तया
नानाप्रकारवर्णांतरघटितत्वेनचपरागपरिमलादिमत्कमलोपमितत्वमितियोजनीयं कमलेयथामधुमात्रसारग्राहिणीभृंगिरमतेसर्वपुष्परससूयमधुपा
नस्वाभाव्येनसर्वासामपिमध्वाधिक्यलिलिक्षयाप्रभूतमधुवत्वेनचतस्मिन्नेवविशिष्टासक्तिमती तथासर्वमंत्रबीजवाच्यदेवताऽस्मनासर्वांगगतापिह्रीं
कारस्यविशिष्टगुणवत्वेनसर्वपादानसगुणब्रह्मप्रतिपादकतयातदीय स्वरूपतटस्थलक्षणवत्वेनतदभिन्नस्वरूपतयासर्वशब्दजालप्रकृतित्वेनचरू
ढ्यालक्षणतयाविनाचतत्संबंधिनीसत्तितदुपासकानांतदधिष्ठानतयाचित्तेलक्ष्यतइतिभृंग्युपमायावर्णितेतितात्पर्यार्थः ॐ ह्रींकाराबुजभृंगीकायै
नमः १८ ह्रींकारसुमनोमाध्वीः ह्रींकारस्यवांछितार्थफलदायकतयासुमनः सादृश्यअथवापुष्पाणिव्यवहारसमयेबहुसावधानतयाव्यवहर्त्तव्या

निपरममार्दवाधिकरत्वेनबहुमान्यत्वात्तथा ह्रींकारोप्युपासनावेलायांपरब्रह्मवाचकत्वेनप्रयत्नपूर्वकमेकाग्रमनसादेवताभिन्नत्वेध्यातइतिनियमसंपाद
नार्थंपुष्पैर्यमितइतिभावनीयंतथाचवाय्वादिनाशुष्कानिपुष्पाणिनिर्मधुत्वेनफलान्यजनयित्वापरिपतंतिफलजनकशक्त्यभावेनतद्भिन्नतराणितुतद्वत्वेनत
ज्जनकानिलोकेदृष्टानिपुष्परसस्यपृथिवीकारणभूतोदकतन्मात्रस्वरूपमधुररसात्मकत्वात्पुष्पाणांफलजनकरत्विज्ञापकोभवतितथाह्रींबीजस्यापिसर्वेज
नकताशक्त्याधायकतदधिष्ठानसच्चिदानंदपरब्रह्मस्वरूपासतितन्मात्रप्राप्त्यायथोक्तफलहेतुतयातदर्थरूपणत्वइतिभवतीतिमाध्वीसमानधर्मत्वमस्याउपप
द्यतइतिविवेचनीयमितियावत् ॐ ह्रींकारसुमनोमाध्व्येनमः १९ ह्रींकारतरुमंजरीफलार्थिनः स्वास्त्रजनात्पतनादिभ्यः प्रतिबंधकेभ्यः तारयति पारंप्राप
यति फललाभेनसंतोषयतीतितरुः ह्रींकारस्यकल्पितरुदृष्टांतीकृतः प्रेक्षावतांसंवादिप्रवृत्तिजनकत्वेनशाखोपशाखाग्रगतापुष्पमंजरीफलकारणयोग्य
तांज्ञापयतीवपुरुषार्थार्थिनामप्यतिशयप्रवर्त्तकत्वेनप्रत्यक्षस्वरूपापिसतिगुरूपदिष्टमंत्रदेवतात्मतयामंत्रोपासनायामभिमुखीकरणेनपुरुषार्थानप्राप
यतीतिमंजरीसादृश्यंप्राप्तपरदेवततयेतिविवेचनीयं ॐ ह्रींकारतरुमंजर्यैनमः २० इतिश्रीमत्परमहंस॰ खंडचरमवर्णार्थप्रकाशे॰ सकाराख्या सकार
युक्ता श्रीविद्यानामकअख्यावाचकशब्दः यस्याः सातथा ॐ सकाराख्यैनमः १ समरसा समः एकः रसः मधुरादिरसवत्तगुडपिंडादौएकरूपेणका

यः व्याप्यस्थितेत्यर्थः अथवारसाः संसारदशायांसर्वज्ञत्वाकिंचिज्ज्ञत्वादिविशेषेणभेदेनभिन्नरसवत् भीन्नस्वभाववत्प्रतीयमानयोरीश्वरजीवयोर्वेदांत
श्रवणादिनांजन्याखंडाकारवृत्तिव्याप्त्याहंब्रह्मास्मीत्यभेदेनानुभवदशायामेकरूपत्तयासाक्षात्क्रियत्तइतिसातथोच्यते रसोवैरसःइतिश्रुतेःरसशब्दार्थःपरब्र
ह्मरसः अभिन्नयस्याः सातथा तैत्तिरीयोपनिषत्प्रतिपाद्येत्यर्थः ॐ समरसायैनमः २ सकलागमसंस्तुता असंभंताद्गमयतीतिआगमाः सकलपदार्थगो
चरसविकल्पप्रमाजनकत्वेदाइत्यर्थः सफलैः अन्यूनानतिरेकेणेतिहासपुराणादिसहित्तयावेदांगोपांगरहस्यादियोगित्वंसकलशब्दार्थः तेनसंस्तुतास
म्यङ्नातः परंकिंचिदस्तीतिनिश्चयपूर्वकंगुणिनिष्ठगुणाभिधानविषयतयातदुपजीविकेत्यर्थः सर्वार्थप्रकाशकवेदानांसर्वज्ञत्वेनानंदपर्यायेणतदियस्तुति
विषयत्तयाशुद्धचैतन्यात्मकत्तयामोक्षकारिणीभूतज्ञानस्वरूपत्वेनजिज्ञास्येतिध्वनितोर्थः ॐ सकलागमसंस्तुतायैनमः ३ सर्ववेदांततात्पर्यभूमिः वेदानां
मंतः आवसानः तत्वमस्यादिवाक्यानितेषांतात्पर्यंसमन्वयसामानाधिकरण्यमित्यर्थः तस्यभूमिः विषयः ज्ञाप्यमित्तियावत् उपक्रमोपसंहारावभ्यासोपू
र्वताफलआर्थवादोपपत्तीश्चलिंगंतात्पर्यनिश्चयइत्तिवचनेनोक्तात्पर्यनिर्णायकप्रमाणबलनात्तींद्रियधर्मादिगोचरवाक्यवत्सर्वेषांवेदांतानांमुपासनज्ञा
नविधिंविनाकर्मशेषतयाज्ञात्रज्ञापकत्वेनसंशनादेवशास्त्रशब्दवाच्यानामद्वैतब्रह्मणिगत्तिसामान्येनकर्मोपासनाकांडद्वयार्थोपकार्यत्वेनमोक्षहेतुज्ञा

नजनकत्वेनपर्यवसानमितितात्पर्यविषयताअखंडचैतन्यस्येतिसिद्धांतार्थइत्यभिसंधिः सामानाधिकरण्यंचविशेषणविशेष्यता लक्ष्यलक्षणभावश्च
प्रदार्थप्रत्यगात्मनामित्तिन्यायेनसंबधत्रयेणाखंडार्थंवेदांताः बोधयंत्तीतितत्वसमन्वयादित्याधिकरणेः प्रतिष्ठापित्तमित्यलमतिविस्तरेण ॐ सर्ववेदां
तताप्तर्यभूम्यैनमः ४ सदसदाश्रया अपरोक्षत्तयाः सुत्रित्तिप्रतीतिविषयतयाव्यवह्रियमाणंसद्रूपादिवत्तयाव्यावहारिकसत्ताश्रयापृथिव्यप्ते
जोभूतत्रयंसदित्युच्यंत्ते असत् तदभिन्नतयापरोक्षज्ञानगोचरवय्वाकाशादितत्कार्यंचरूपादिभिन्नगुणाश्रयमुच्यत्तेत्यर्थः तयोः आश्रयाउपादानत्वेन
तदधिष्ठानभूतेत्यर्थः अरोपितस्याधिष्ठानसत्तातिरिक्तसत्ताभूशून्यतयासत्तास्फूर्तिप्रदत्वेनसर्वदातदनुस्यूतेतिध्याये ॐ सदसदाश्रयायैनमः ५ सक
लाअरोपितसकलाभिरूपासनार्थककल्पिताभिः जावालिनासत्यकामंप्रत्युक्तेषोडशकलायुक्तपुरुषोपासनप्रतिपादकछांदोग्यवचनरीत्याकलाशद्बिता
वयवैवसहवर्त्तत्तइतिसातया चतुःषष्टिचंद्रकलाभ्यांवासहित्ता अथवाकलाशब्दः मुखादिकांतिवचनः तयासहित्तेतिवार्थः ॐ सकलायैनमः ६ स
च्चिदानंदाः सच्चासौचिच्चसचित् सचित्चासौआनंदश्चकालत्रयाबाध्यत्वंसत्वंस्वेत्तरप्रकाशाप्रकाशित्वपरमप्रेमास्पदत्वमानंदत्वं सत्यंज्ञानमनंतं विज्ञा
नमानंदंसदेवसोम्येदमग्रआसीत् प्रज्ञाप्रतिष्ठाप्रज्ञानंब्रह्मआनंदोब्रह्मेति व्यंजनात् आनंदंब्रह्मणोविद्वान् नबिभेति कुतश्चनेत्यादिश्रुतिभ्यः ते य

त्रि०भा० स्याः सातथोक्ता वेदांतशास्त्रोक्तब्रह्मस्वरूपलक्षणलक्षितेत्यर्थः ॐ सच्चिदानंदायेनमः ७ साध्याकर्मोपासनादभिर्महावाक्यश्रवणजन्यब्रह्मविद्याले
३१ नसाधनचतुष्टयसंपन्नाधिकारिणापरोक्षतयासाधितुंप्राप्तुंमहाफलस्वरूपत्वादित्यर्थः साध्वीतिपाठः साधोः स्त्रीसत्वगुणसंपन्नः साधुः सकलविद्या
पारंगतत्वेसतिसदाचारसंपन्नादेवीसंपतिरित्यर्थः तदेकनिष्टापरमपत्तिव्रतासत्करस्त्रीणांपातिव्रत्यसंप्रदायप्रवर्तकेतियावत् ॐ साध्व्यैनमः ८ सद्ग
तिदायिनी समीचितापुनरावृत्तिरहितासुखमात्ररूपागतिः गम्यते ज्ञायते प्राप्यतइतिवागतिः यत्तुज्ञायतेतदेवगतिः तदन्यस्यज्ञातत्वाद्गतित्वानु
पपत्तेः ज्ञातेफलेच्छयातत्साधनेषु पुरुषप्रवृत्ते तत्वज्ञानफलसाधनइत्यन्वयव्यतिरेकाभ्यांब्रह्मविदाप्नोतिपरंब्रह्मवेदब्रह्मैवभवति येपूर्वंदेवाऋ
षयश्चतद्विदुस्तेतन्मयाअमृताबभूवुः इत्यादिश्रुत्याचपरदेवतास्वरूपमेवमुक्तिस्वरूपत्तयासद्गतिः तदावरकाज्ञानाभिभावेनस्वरूपानंदाभिव्यंज
पत्ती दायिनी अभेदेपिगतिदानयोः कर्मकर्तृप्रयोगः उपपद्यते तदात्मानं स्वयमकुरुतेत्यादिवादित्यर्थः सतीवासत्वगुणयुक्तादेवयानादिगतिं
वावासतांज्ञानिनांवा ददातीति सातथा ॐ सद्गतिदायिन्यैनमः ९ सनकादिमुनिध्येया मननशीलाः अनयः मननशब्देनलक्ष्यातत्साक्षात्कार
वंतइत्यर्थः ब्रह्मणमानसिकपुत्राः ज्ञानवैराग्यबहुलाः मोक्षमार्गप्रवर्तकाः सनकः आदिर्येषांतेमुनयः सनंदनसनातनसनत्कुमारप्रमुखाः निरु ३१

षाणानिश्रिताः तैर्ध्येयाआत्यादेरणस्वात्मभेदेनेनसर्वदाविषयीकृतेत्यर्थः त्वंवा अहमस्मिभगवोदेवते अहंवैत्वमसिक्षेत्रज्ञत्वापिमाविद्धिआत्मानं
चेद्विजानीयादयमस्मीतिपुरुषः अथयोन्यांदेवतामुपास्तेन्योसावन्योहमस्मीतिनसवेदयथापशुः मृत्योः समृत्युमाप्नोतियइहनानेवपश्यतीत्यादि
श्रुतिस्मृतिशतेभ्यः ॐ सनकादिमुनिध्येयायेत० १० सदाशिवकुटुंबिनी सदाशिवः कुटुंबंअस्यास्तीतितथा ॐ सदाशिवकुटुंबिन्यैनमः ११ सकलाधिष्ठा
नरूपा अथातआदेशोनेतिनेतिनेहनानास्तिकिंचनेत्यादिनिषेधश्रुतिभिः प्रतिपन्नासर्वंखल्विदंब्रह्मेत्यादिबाधायांसामानाधिकरण्यमवगम्यते कार्यस्य
कारणाभेदज्ञानबाधातद्भिन्नताज्ञानस्यभ्रमरूपत्वात् तथाचश्रुतिषेधस्यावध्यपेक्षायांप्रकृत्यादीनामपितत्वज्ञानेननिवृत्तोभूतपूर्वगत्यासर्वाधिष्ठानत्वे
नानुभूयतेतिभावः ॐ सकलाधिष्ठानरूपायैनमः १२ सत्यरूपासत्यंजडानृतपरिच्छिन्नव्यावृत्तंसच्चिदानंदरूपंयस्याः सातथा परिणामवादमाश्रित्य
सदपरोक्षज्ञानयोग्यानिपृथिव्येपेजासितेः परोक्षज्ञानविषयः नित्यानुमेयमित्यर्थः सत्यत्वाभवादितिश्रुतेः सत्यरूपंयस्याः सातथा ॐ सत्यरूपायैन
मः १३ समाकृतिः समाभिन्नासच्चिदानंदस्वरूपैकरसाकृतिर्मूर्तिस्वरूपयस्याः सातथोक्ताअन्योन्यानतिरिक्ताः यथाशास्त्रप्रमाणमूर्तिः विग्रहायस्यांस्य
तिवासमासदाशिवेनगुणसौर्यबलवीर्ययशोगांभीर्यइंगितादिपरिज्ञानसर्वज्ञत्वादिबहुलधर्मविशेषैर्मूर्तिर्यस्याः सेतिवाचतुर्विधभूतग्रामेषुतत्सारब्धा

नुसारेणसमात्तत्रतत्रनिवासयोग्यामूर्त्तिर्यस्याः सेतिवा धर्माध्यक्षतयाततत्फलविशेषदानेषुसमापक्षपात्तरहितताभूर्त्तिर्यस्याः सेतिवाचतुर्विधे सास
मा॰बाल्यस्थविरत्वादिभावविकारवर्जिता एकप्रकारानित्ययौवनशालिनीमूर्त्तिर्यस्याः समः सर्वेषुभूतेषुसन्दत्तिंलभतेवरां अंगुष्टमात्रः पुरुषोत्तरात्मा
सदाजनानांहृदयेसन्निविष्टः इतिश्रुतिस्मृतिभ्यामेकरूपावगमादित्याशयः ॐ समाकृत्तयेनमः १४ सर्वप्रपंचनिर्मात्री संसारस्यअनादितयाअमोक्षस्था
पित्वेनचभूतभविष्यद्वर्त्तमानगत्यासर्वशब्दवाच्यत्वंप्रपंचस्यप्रपंच्यतेविस्तार्यत्तेविवर्त्तइतिप्रपंचः एकंबीजंबहुधायः करोतीतिश्रुतेः तस्यनिर्मात्रीनिर्मा
णमभिव्यक्तिः तन्निमित्तयोतेतत्कर्त्तृत्वमुपचर्यते देवदत्तः पचतीतिवत् ॐ सर्वप्रपंचनिर्मात्र्येनमः १५ समानाधिकवर्जिता कुलशीलजातिगुणादिभिस्तु
ल्यः समः तेःश्रयानधिकः तैर्वर्जिता॰ नतस्यप्रतिमास्तिविश्वाधिकोरुद्रोमहर्षिरितिश्रुतेः सर्वाधिपंसंकुरुतेमहात्मेतिएकमेवाद्वितीयंब्रह्मनत्व
त्समश्चाभ्यधिकः कुतोन्योइतिश्रुतिस्मृतिभ्यांचेतिभावः एतदृष्यासमाननीयः समानः पूजयोधिकः तद्द्वयेनवर्जिताएकमेवाद्वितीयमित्यादिश्रुतेरित्यर्थः
ॐ सामानाधिकवर्जितायेनमः १६ सर्वोत्तुंगाकार्यापेक्षयाकारणस्याधिकत्वात्सर्वापेक्षयाउत्तुंगाउन्नतापादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवीति
श्रुतेः ॐ सर्वोत्तुंगायेनमः १७ संगहीना निरवयवत्वेननिष्कारणत्वेनचानिर्गुणत्वेनचानिराश्रयत्वेनानित्यशुद्धबुद्धमुक्तस्वरूपत्वेनसंबंधरहितावा॰अ ३२

संगोनहिसज्जते नचास्यकश्चिज्जनितानचाधिपइत्यादिश्रुतेरित्यनुशयः ॐ संगहीनायेनमः १८ सगुणासमाः एकप्रकारागुणाः सत्यकामत्वादयः य
स्याः सातथा गुणीसर्वविद्यः सत्यकामः सत्यसंकल्पइत्यादिश्रुतेः त्रिमूर्त्तिरूपतयासत्वरजस्तमोगुणैः सहवर्त्ततइतिवातथा ॐ सगुणायेनमः १९ सक
लेष्टदाइच्छाविषयभूतानिइष्टानिकाम्यानित्यर्थः सकलानिचतानीष्टभेदसमाः अन्ययादिवादिवत्कस्मिंश्चविषयेअसामर्थ्यशंकास्यात् एकस्यपरमा
र्थस्यबहुनामिच्छाविषयत्वदर्शनात् एकत्रकामनायामपितत्सल्लभावित्वेनसर्वप्राप्तत्वोक्तोपरदेवतायाः बहुफलप्रदातृत्वेनअत्यंतविश्वसनीयतायामति
शयप्रतिभानमित्यर्थः अथवा परिछिन्नपरिमितभाग्यवत्प्राणिसर्वस्यसर्वत्रइच्छायामपियानिसर्वाणिस्वबुध्याशास्त्राविरोधेनेष्टानि एष्टव्यानिवांछितव्या
नितान्येवप्रयच्छतिददातिनतदधिकानि॰ लोकेच्छायाः बहुप्रकारत्वेनदुष्पूरणीयत्वादितिभावः सर्वेषांप्राणिनामिष्टाइज्यया॰ पूजयाविषयीकृतायज्ञेन
वासमाराधितातस्यफलप्रदेत्यर्थः अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवच एषह्येवसाधुकर्मकारयतीयमेभ्योलोकेभ्यउन्निनीषतइतिश्रुतिस्मृतिभ्यांपर
मेश्वरार्पणबुध्याक्रियमाणस्यैवकर्मणः शुभफलत्वात् मुक्तिहेतुत्वेनकाम्यफलार्थिनांजन्ममरणादिबंधकत्वेनस्वल्पफलयोत्ते अनादरणीयत्वात् इत्य
र्थः अथवा कलाभिः अवयवैः तरतमभावैरित्यर्थः तेः सहितानिइष्टानिफलानिमनुष्यानंदादिब्रह्मानंदपर्यंतानिफलानिआनंदस्वरूपाणिददातीतितथा ॐ

त्रि॰भा॰ सकलेष्टदायैनमः २० इतिश्रीमत्परमहंस॰ प्रथमनामार्थप्रकाशनं॰ ककारिणी तृतीयखंडद्वितीयवर्णरूपः ककारावयवः वाचके अस्यास्तीतितथा ॐ क
३३ कारिण्यैनमः १ काव्यलोलाः वाल्मिकिवेदव्यासादिकृतेषुकाव्येषुलोलाः वाच्यलक्ष्यार्थभेदेनतत्रसंबंधेत्यर्थः अथवा कविभिः कालिदासादिभिः कृतेषु
स्तुतिविशेषेष्वलंकाररसादिमिश्रितसौंदर्यलहरिप्रमुखेषुवाप्रीतिमतीत्यर्थः ॐ काव्यलोलायैनमः २ कामेश्वरमनोहराः कामेश्वरस्यमनः हरतीतितथा
ॐ कामेश्वरमनोहरायैनमः ३ कामेश्वरप्राणनाडी कामेश्वरस्यप्राणनाडी ययानाड्याप्राणः संचरतीतितथाजीवनाडीत्यर्थः इडयातुवहिर्यातीतित्ति
यखंडवचनात् लोकेविशस्यमानपशोर्हृदयपुंडरीकाकारमांसखंडात्मकांतसुषिराष्टदलोपेतमंगुष्ठपरिमाणसुषिरयुताधोभागकर्णिकामध्यमेदृश्यंते त
स्यकर्णिकस्यकेसरायमानाः एकशतंनाडीनामंकुराः तद्वेष्टनपूरितत्नामकेनाडीसुषिरविन्यस्तमूलाःभवंति तत्रसुषुम्नानामकानाडीमूलाधारादारभ्यब्र
ह्मरंध्रपर्यंतंगता तस्याःषट्चक्राणिमूलाधारादीनितत्तन्मातृकावर्णरहितयोगशास्त्रोक्तदलसंयुतानिसन्नद्धानिवर्ण्यंते तस्याः मूलेपृथिवीदेवताबिस
तंतुतनीयसीकुंडल्यथोमुख्यावरणशक्तिः निद्रातितस्याः दक्षिणभागेइडानामनाडीभ्रूमध्यपर्यंतंप्रसृता वामेपिंगलातथा तथाचजाग्रदवस्थायांनेत्रयोः
दंपत्यात्मनाश्रुतिप्रतिपादिता स्वप्नेमनोपाधिकेः सुषुम्नाअज्ञानोपाधिकः जाग्रतिस्थूलशरीराभिमानीविश्वइत्युच्यते स्वप्नेसूक्ष्माभिमानितैजसःसुषु ३३

प्तौकारणाभिमानीप्राज्ञः सुषुप्तेकारणात्मनास्थितानिस्थूलसूक्ष्मशरीरजन्यभोगसाधनप्रारब्धकर्मवशेनपुरितद्वारानाडीमार्गेणतत्तद्गोलकाः प्रविशं
तींद्रियाणितदुपरिमप्रारब्धाद्बाधेहदालिकायाविद्यमानोराजाग्रहात्सोपानमार्गद्वाराप्रासादेविहृत्यतदवच्छिन्नजंतः पुरपर्यंकेशयानइवनाडीद्वारपुरित
त्प्रविश्यतदवच्छिन्नहृदयोपाधिकपरमानंयदाप्रविशतितदासुषुप्तिरित्युच्यते लिंगशरीरंकारणात्मनालियते तदाप्राणादिवायवः प्रलीनवृत्तयः संतःआयुः
स्वरूपेणशरीरंरक्षंति तथाच भाविजाग्रत्स्वप्नभोगानुकूलकर्मानुबंधप्राणधारणंसुषुप्तेसोपाधिकचैतन्यस्यैवदृश्यते तत्सत्वाचनाडीनांप्राणसंचारयोग्य
तापि एवंचसतिनप्राणेननापानेनान्योजीवतिकश्चन इतरेणतुजीवंतियस्मिन्नेताउपाश्रिताविति श्रुत्याच॰ जीवप्राणधारणइतिधातुपाठात् प्राणनाडीशब्द
स्यलक्षणयापरमात्मैवोच्यते कामेश्वरस्यैवप्रारब्धकर्मजन्यशरीरमात्राभावेपिघृतकाठिण्यन्यायेनमूर्त्तिमत्तया तदंतर्भाविसंभावनयेतन्नामकामेश्वरस्यप्रा
णनाडीतदधिष्ठानचैतन्यमितिफलितोर्थः ॐ कामेश्वरप्राणनाड्यैनमः ४ कामेशोत्संगवासिनी कामेशस्यउत्संगेवामांकेवसतीतितथा अनेकमन्म
थाकारकामेशोत्संगवासिनीतिललितातापनीये ॐ कामेशोत्संगवासिन्यैनमः ५ कामेश्वरालिंगितांगी तेनालिंगितांगीकृतंअंगंअस्याः अस्तीतिसा
तथा ॐ कामेश्वरालिंगितायैनमः ६ कामेश्वरसुखप्रदा कामेश्वरायसुखंप्रददातीतिवा कामेश्वरस्ययत्सुखंब्रह्मस्वरूपसच्चिदानंदस्वसाक्षात्का

त्रि॰भा॰ रात्मकं देवाश्रूवानंप्यतीतिश्रुत्युक्तन्यायात् स्वकियभक्तानां कामेश्वरानंदरूपं सच्चिदानंदघनात्मकं मोक्षं ददातीत्यर्थः ॐ कामेश्वरसुखप्रदायैनमः ७
२४ कामेश्वरप्रणयिनी· कामेश्वरस्यस्वस्वरूपेपरमानंदघनेयाप्रीतिः तद्विषयभूतेत्यर्थः ॐ कामेश्वरप्रणयिन्यैनमः ८ कामेश्वरविलासिनी कामेश्वरस्यविला
सः कायात्मिनाविवर्तः अस्याः अस्तीतितथा ॐ कामेश्वरविलासिन्यैनमः ९ कामेश्वरतपः सिद्धिः कामेश्वरस्यतपः जगदालोचनात्मकं सिध्यते अनये
तिसिद्धित्तपः साधनभूतेत्यर्थः स्त्रीपुरुषात्मनाकल्पितभेदवशाज्जगत्सर्जनसाधनभूतेत्यर्थः ॐ कामेश्वरतपः सिद्ध्यैनमः १० कामेश्वरमनः प्रियाः म
नसः प्रियानिरवधिकप्रेमास्पदेत्यर्थः ॐ कामेश्वरमनः प्रियायैनमः ११ कामेश्वरप्राणनाथा कामेश्वरस्यप्राणः हिरण्यगर्भः तन्नाथयतिपालयतीतित
था कामेश्वरप्राणनाथाः वल्लभोयस्याः सेतितथा ॐ कामेश्वरप्राणनाथायैनमः १२ कामेश्वरविमोहिनी कामेश्वरंमोहयतीस्वयंभिन्नविग्रहवतीसति
आवांदंपतीतद्विप्रकारज्ञानवंतंकरोतीतितथाः अभेदज्ञानवत्तः तद्विपरीतज्ञानवत्वंमोहः तत्करोतीतिसातथा अथवामोहोनामब्रह्मेरेकात्वंबनतयातदन्या
विषयीकृत्वंपरमेश्वरस्यस्वस्वरूपपरदेवतापरमानंदसाक्षात्कारेणस्थाणुवन्निलतयोपचारेण मोहवत्तयातदितरप्रपंचाकारेकत्वाधायकत्वदर्शनेनचमोह
यत्तीत्युपचारेणामः मोहयतिवेत्यर्थः अंतःपुरंगतराजानंस्त्रियासक्तमितिवदित्यर्थः ॐ कामेश्वरमोहिन्यैनमः १३ कामेश्वरब्रह्मविद्या कामेश्वरस्यतत्व २४

पदार्थसाक्षात्कारभूतेत्यर्थः यत्साक्षादपरोक्षाद्ब्रह्मेतिश्रुतेः ॐ कामेश्वरब्रह्मविद्यायैनमः १४ कामेश्वरगृहेश्वरियद्यतइतिगृहः सर्वज्ञानंतस्यइश्वरी॰वि
षयाधिष्ठानभूतत्वेननियामकेत्यर्थः अथवागृहणीगृहमुच्यतइतिन्यायात्कामेश्वरः गृहेश्वरः अधिपतिरस्याः अस्तीतितथा ॐ कामेश्वरगृहेश्वर्यैनमः १५
कामेश्वराल्हादकरीआल्हादः तत्सिजन्यंसुखंपरमेश्वरस्यनित्यंतत्सत्वस्साशक्तिपरदेवतात्मकरोतीतितथा ॐ कामेश्वराल्हादकर्यैनमः १६ कामेश्वरम
हेश्वरी महतीचसाइश्वरनिरूपाधिकैश्वर्यवतीमहान्प्रभुर्वैपुरुषइतिश्रुतेः कामेश्वरस्यमहदैश्वर्यंअस्याः अस्तीतितथाभगवतीत्यर्थः ऐश्वर्यस्यसमग्र
स्यवीर्यस्ययशसः श्रियः ज्ञानवैराग्ययोश्चैवषण्णांभगइतीरणात् तमीश्वराणांपरमंमहेश्वरमितिश्रुतेः ॐ कामेश्वरमहेश्वर्यैनमः १७ कामेश्वरी म
न्मथोपासितविद्यारूपेत्यर्थः ॐ कामेश्वर्यैनमः १८ कामकोटिनिलयाषण्णवतीपीठेषुमध्येकामकोटिः कांचीपुरपीठश्रीचक्रमित्यर्थः निलयंगृहंय
स्याः सातथा ॐ कामकोटिनिलयायैनमः १९ कांक्षितार्थदा· कांक्षितात् कांक्षाविषयभूतात् प्राप्तसजातीयेच्छाकांक्षातद्गोचरान्पदार्थान्ददातीति
तथा कांक्षितासती उपास्यदेवतामेप्रसन्नाभूयादितीच्छयाचीरकालोपासितासतिपुरुषार्थानितिप्रार्थ्यमानस्यापिस्वयमेवददातीत्यर्थः ॐ कांक्षिता
र्थदायैनमः २० इतिश्री॰ द्वितीयवर्णनामार्थप्रकाशनं १२ लकारिणी तृतीयखंडतृतीयवर्णत्वेनवाचकतयाअस्याः अस्तीतिसातथा ॐ लकारिण्यै

त्रि॰भा॰ नमः १ लब्धरूपाः रूप्यन्तेज्ञाप्यन्तेऐर्हरिरितिरूपाणिलक्षाणिनिःस्वरूपतटस्थभेदेनसगुणनिर्गुणपराणिलब्धानिययासातथा रूप्यतेज्ञाप्यतेइतिरूपः
२९ अर्थः उपलक्षणंनाम्नोपिलब्धेनामरूपेययासातथा अंदोस्वयंमायोपाधिनाशब्दार्थभावमापद्यपश्चात्तथ्याकंकरणमकरोदितिभावः ॐ लब्धरूपायै
नमः २ लब्धधीः निश्चयात्मकाः सविकल्पात्मिकाः अंतःकरणवृत्तयोधियःताःउपाधित्वेनप्रतिबिंबत्वाधिष्ठानत्वेनलब्धाययासातथा तस्याःरूपचै
तन्यंज्ञानमितिवाचैतन्येद्धावृत्तिर्वेत्ति वेदांतसिद्धांत ६ जडानांविषयाणांगृहणेता दर्शिनी वृत्तीनांमर्थेजगदांध्यप्रसंगेनस्वरूपचैतन्यमंतःकरणाद्युपसहितं
फलचैतन्यतयाप्रकाशयतीतथ्याचब्रह्मण्यज्ञाननाशायवृत्तिव्याप्तिरिहेव्यतीतिन्यायेनलब्धाधीःतत्वमस्यादिमहावाक्यश्रवणजन्यवृत्तिव्याप्तिययासे
त्यर्थः अथवाधीशब्देनसर्वज्ञत्वादिकमुच्यते लब्धाययेतिवायःसर्वज्ञःससर्वविदितिश्रुतेःॐ लब्धधियेनमः ३ लब्धवांछितावांछायाःविषयी
तंवांछितंइष्टफलमित्यर्थः लब्धंपूर्वमेवप्राप्तंतद्यत्तयेतितथा अतमकामेतियावत ॐ लब्धवांछितायेनमः ४ लब्धेपापमनोदूरापायप्रधानानिचत्ता
निमनांसिचपापमनांसियैस्तेसदापापचिंताकाइत्यर्थः तेषांदूराअवेद्येत्यर्थः अन्यत्रधर्मादन्यत्राधर्मादन्यत्रास्मात्कृत्ताकृत्तादितिश्रुतेः तमेवंवेदानु
वचनेनब्राह्मणाविविदिषंतिइतिश्रुत्याविहितानांततद्वर्णेश्रमधर्माणामीश्वरार्पणबुध्याक्रियमाणानांमात्मज्ञानसाधनतयाश्रूयमाणत्वात्तदन्येषांदुः २९

स्वप्राप्तिसाधनत्वेनपापवासनाप्राधान्येदुरधिगम्येत्यर्थःॐ लब्धपापमनोदूरायेनमः ५ लब्धाहंकारदुर्गमाःअहंकारःअभिमानः उपलक्षणं तत्कार्याणां
मासुरसंपत्तिविशेषाणांलब्धःअहंकारःराजसत्तामसात्मकःतेःदुःखेनाप्यधिकप्रयत्नेनक्रियमाणसाधनफलायेनअधिगंतुंज्ञातुमशक्यासत्वंगुणाभावे
देहेंद्रियादेदुःखप्रकाशाअव्याप्तोमनस्थैर्यभावेनरजसः प्रवर्त्तकस्यत्ताचकस्यविक्षेपकस्यतमश्चावरणप्रधानस्यविवेकेज्ञानप्रतिबंधकस्यनिद्रालस्या
दिसमुद्भवस्यकार्येणजामित्तादिरूपेणश्रेयोमार्गसाधनानुष्ठानेगुरुवेदयोः श्रद्धाक्षयेबाह्यविषयसंपादनेव्यग्रमनस्यलाभहेतुकहर्षशोकजन्यरागद्वे
षपरतंत्रेअनात्मज्ञअसुरसंपत्तिमतांवित्तेनभातीत्याशयः प्रसुत्तजननमरणप्रवाहरूपसंसारमेवानुभवंति तानहंद्विषतःक्रूरानइतिभगवद्वचनात्॰
अतःनिरभिमानपुरुषेणस्वाभीष्टलाभायचित्तेसदाचिंतनीयेत्यर्थः यतयः शुद्धसत्वाइतिप्रामाण्येभ्यइतिद्रष्टव्यंॐ लब्धाहंकारदुर्गमायेनमः ६ भक्ति
शक्तिःलब्धाशक्तिः सकलसामर्थ्यहेतुभूत्तामायात्मिकाययासातथा तेध्यानयोगानुगत्ताअपश्यन् देवात्मशक्तिंस्वगुणैर्निगूढामितिश्रुते ॐ लब्धशक्त्येन
मः ७ लब्धदेहाःलब्धःदेहःविग्रहःययासातथा स्वेछावलंबित्तमूर्त्तिःधृत्तकाठिण्यन्यायेनजीवत्वाभावेनकर्माधीनत्वाभावात् तथाचसति अध्यस्त
मायाशक्तेःस्वभेदकत्वस्वाभाव्येनपत्तीश्चपत्नीचाभदितिश्रुत्याचदंपतिमूर्त्तिमतीबभूवेत्यर्थःॐ लब्धदेहायेनमः ८ लब्धैश्वर्यसमुन्नत्ति ऐश्वर्याणांस

त्रि॰भा॰ मुन्नतिः अधिक्यपर्यवसानमित्यर्थः लब्धाऐश्वर्यसमुन्नतिर्यया सा तथा तमीश्वराणां परमं महेश्वरमिति श्रुतेः नांतोस्ति मम दिव्यानामिति स्मृतेश्च एष
३६ सर्वेश्वर एष सर्वज्ञ एषांतर्याम्येष योनिः सर्वस्येति श्रुतौ निरुपाधिकमहैश्वर्यस्य निरवधिकत्वमिति किमु वक्तव्यमिति ज्ञायत इत्यभिप्रायः ॐ लब्धैश्वर्य
समुन्नतये नमः ९ लब्धर्द्धिः ऋद्धिर्नाम व्याप्तिः परिपूर्णत्तेत्यर्थः अवयवोपचयात्मिका न तस्याः कर्मजन्यत्वेन विनाशहेतुत्वात् स वा एष महानज आत्मा न व
र्धते कर्मणेति श्रुतिवचनात् निष्कलं निष्क्रियमित्यवयवमात्रनिषेधाच्च तथा च लब्धर्द्धिः सर्वव्यापकता स्वे स्वरूपे सत्युपाधिभिर्जन्यैस्तदाश्रयभूतैरभि
व्यज्यते तत्त्वविद्यामनारोप्यत इति निष्कर्षार्थः ॐ लब्धर्द्धये नमः १० लब्धलीला लीला अन्यप्रयोजनार्थव्यापाराः स्वहर्षोद्रेकमात्रकार्याः ततत्कालो
चितशृंगारादिनवरसांगीकारसमसमयतदुचितभंगीविशेषा वा लब्धा यया सा तथा ॐ लब्धलीलायै नमः ११ लब्धयौवनशालिनी अस्तित्वजननवर्धन
भावविकारावस्था बाल्यं परिणयः अपक्षयः नाशः उत्तरावस्था जरादेहाभावेन तदुभयनिषेधेऽर्थात्तु यौवनं यौतीति गच्छतीति युवा दृढबलवीर्यः तस्य भावः
यौवनं तदुभयवयोवस्थाराहित्येनैकस्वरूपता तल्लब्धं प्राप्तं यौवनं यया सा तथा अजरोमरोमृतोभयो ब्रह्मेति श्रुतेः सर्वदैकप्रकारस्वरूपवतीति भावः ॐ
लब्धयौवनशालिन्यै नमः १२ लब्धातिशयसर्वांगिसौंदर्यसुंदरस्य रुचिरस्य भावः सौंदर्यं अवयवानां सर्वेषां सौंदर्यमितिशायी सर्वांगेषु सर्वांगेषु सर्वाव ३६

यवेषु लब्धा यया सा तथा सर्वात्मकतया सर्वकर्तृत्वादिति भावः ॐ लब्धातिशयसर्वांगिसौंदर्यायै नमः १३ लब्धविभ्रमाः लब्धः विभ्रमो पया सा लब्धवि
भ्रमा सर्वजगत्कारणमित्यर्थः ॐ लब्धविभ्रमायै नमः १४ लब्धरागाः लब्धं सजातीयेकामः रागः सोकामयतेति श्रुत्या जगत्सर्जनस्य कामनापूर्वकत्वप्र
तिपादनात् लब्धरागो यया सेतीत्यर्थः ॐ लब्धरागायै नमः १५ लब्धपतिः लब्धः स्वद्वैतैयैव स्वयंवरे पतिः कामेश्वरो यया सा तथा ॐ लब्धपतये नमः
१६ लब्धनानागमस्थितिः आत्मगतानूनामात्प्रकारैः कर्मोपासनाज्ञानकांडतत्तदंगत्वादिभिः गमयंतीत्यर्थान् प्रकाशयंतीत्यागमाः वेदाः नाना अनेक
शाखाभिन्नसामादयः तेषां स्थितिपरिपालनं लब्धा यया सा तथा नानागमस्थितिः वेदचतुष्टयोक्तमर्यादा काण्डत्रयविषया लब्धा यया सेति वा संसार
स्यानादित्वेन निरपेक्षप्रमाणभूतान् वेदान् सर्वे वेदा यत्रैकं भवंतीति श्रुतेः स्वस्वरूपभूतान् प्रलयसंरक्षसर्गादौ जायमाणहिरण्यगर्भस्यान्यूनानतिरेकेण
तानेव प्रत्यभासयती स्वयं दंपतीभूत्वा तदुक्तधर्मानुष्ठायपरेषामथ नुष्ठापयतीति च वेदशास्त्रं ममैवाज्ञा वर्तत एव च कर्मणि यदि ह्यहं न वर्तेयं जातु कर्मण्य
तंद्रितः उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं इत्यादि भगवद्वचनात् ॐ लब्धनानागमस्थितये नमः १७ लब्धभोगाः भोगसुखमात्रानुभवः दुःखानु
भवे उच्यमाने जीवाविशेषप्रसंगात् लब्धभोग यया सा तथा जीववत्कर्मिकस्वेष्टपदार्थानुभवानंतरकालीनसुखं न भवति स्वस्यानंदस्वरूपत्वेनासिद्ध

त्रि॰भा॰ स्वरूपत्वात्तत्साधनभूतभोगोप्यत्तद्विषयेसिद्धइत्युपचर्यतेति लब्धभोगेत्युच्यते ॐ लब्धभोगायेनमः १८ लब्धसुखा लब्धंसुखंअनुकूलवेदनीयंस्व
२७ स्वरूपभूतंसुखंतत्साधनंचधर्मः ययासातथा ॐ लब्धसुखायेनमः १९ लब्धहर्षाभिपूरिता॰ लब्धः योहर्षः हसिनिमित्तकचित्तोल्लासविशेषः सुखप्रसा
दशरीरपुष्ट्यादिकार्येन्त्रियः जगत्यांस्वाभीष्टपदार्थानुभवादिजन्यसंतोषइतिप्रसिद्धः तेनाभिपुरिता॰ समंताद्न्यूनातिरेकेणावछिन्नरूपत्तयापूरिताभरि
तातद्विपरितदुःखाद्यनुत्पादेनतन्मात्रसमाश्रयानित्यप्रसन्नमुखीत्यर्थः ॐ लब्धहर्षाभिपूरितायेनमः २० इतिश्री॰ तृतीयवर्णनामार्थप्रकाशनं ॐ फ्रीं
कारमूर्त्यैनमः फ्रींकारसौधश्रृंगकपोतिकाः सुधामयंसौधंसुधाविकारः अयत्लिकेत्यर्थः तस्यशृंगंशिखरंचंद्रशालादिभित्युपरिभागः निरूपाधिक
विश्रांतिजन्यसुखानुभवहेतुतयाफ्रींकारस्यसौधोपमातत्रहकारस्यश्वेतवर्णतयाअट्टालिकसादृश्यंरेफस्यरोहितरूपतयेष्टकादिकृताधोभित्युपमाः
हकारोरस्येपरिकारश्रृंगोपमाउर्ध्वगत्यसाम्यात्त् तदुपरितनबिंदुः सर्वप्रकृतिभूतशब्दार्थात्मकत्तदीयात्तद्वयवत्वेनचित्ररूचरूपोपिसूक्ष्मत्तयाधवर
कगतकपोतकौतेवजागरुकमस्पृश्यत्तइतितद्र्थत्वेनपरंदेवतोपमानशब्देनाभिधीयतेचतथाच प्रदीपकालंकारसिद्धिरितिभावः ॐ फ्रींकारसौध
श्रृंगकपोतिकायेनमः २ फ्रींकारदुग्धाब्धिसुखा दोहान्निर्थत्रंदुग्धंस्तनगतपयस्तदीयतापादामक्रियादिक्रियाविशेषोदोहः उपलक्षणंचोषणादि २७

नांजनंतोदकप्रसारितनिम्नभूतप्रदेदः अब्धिरुच्यतेआपःधीयंतेअस्मिन्निति तथा तस्मिन्संजीवकत्वंधर्मः डींभकजीवतेस्तन्यदर्शनात् फ्रींकारस्या
पिहकारयुक्ततयाश्वेत्तवर्णत्वादमृतत्वहेतुश्चतत्सादृश्यंतस्यसुधैवसुधा॰ तदभिव्यक्तत्वाविशेषात्तत्सेवकानांतत्वेसत्तिबहुविधमहिमशालितायाश्चदर्शना
दितिभावः ॐ फ्रींकारदुग्धाब्धिसुधायेनमः ३ फ्रींकारकुमलेंदिरा॰ फ्रींकारबीजस्यविचित्रवर्णतयापरमप्रीतिविषयतयाचकमलोपमानस्यवाच्यार्थतया
तदुपरितत्वेनसर्वपुरुषार्थप्रदात्वाच्चकमलाशब्देनाविधीयत्त तस्याः पद्मालयत्वात् फ्रींकारकमलस्यइंदिरातदधीनब्रह्मविदित्यर्थः ॐ फ्रींकारकमलेंदि
रायेनमः ४ फ्रींकारमणिदीपार्चिः आदिदेविकाद्युपइवानभिभूतेतिसत्तिचिरकालावस्थापित्वंमणिदीपसादृश्यंफ्रींकारस्यप्रकाशं अनित्तरसाधारणः
महातिशयवत्वेनानर्घ्यत्वमावेदयन्तदुपासकस्यनिरवधिकमहत्वापादकफ्रींकारवाच्यत्तयातत्प्रकाशकेत्यर्थः तथाचनिरंतरेतमोपाकरणेनस्वेष्टपदार्थ
पादनेनचसुखयतीतिफलितोर्थः ॐ फ्रींकारमणिदीपार्चिषेनमः ५ फ्रींकारतरुशारिका॰ तारयतिफलार्थिनास्वारूढान्पाततदेरक्षतीतितरुः तस्यशा
रिकाः पिंगंतुंडनेत्रचरणशारिकाअभ्यासातिशयेनमनुष्यभाषाअपिभाषते भूतभविष्यद्वर्तमानलोकयात्रापरिज्ञात्रीसतिशुभाशुभफलप्राप्तिंचस्वभा
सति षयावदति अस्यबिजस्यवाच्यार्थतयातत्संबंधिनीविद्वाचासर्वप्रकाशयतीत्यर्थः ॐ फ्रींकारतरुशारिकायेनमः ६ फ्रींकारपंजरमणिः शूल्हनसाधने

त्रि०भा० तयाह्रींकारः पेटकेनदृष्टांतीक्रियते· तस्यमणिर्वैडूर्यमित्यर्थः यथाहीरादिमणिः पेटकादिगोपितोपिस्वकांत्याबाह्यांतः प्रकाशयंतीतरपेटिकेभ्यः तंव्या
३९ वर्तयति तथैतदपिबीजंस्ववाचकतयेतरवर्णेभ्यः निरतिशयमहिमाभेदयतीतिभावः ॐ ह्रींकारपेटकमणयेनमः ७ ह्रींकारादर्शबिंबिका· अस्यबीजस्य
प्रमाणानपेक्षवेदांतांतर्गततयानिर्दोषत्वादादर्शसाम्यंतस्मिन्बिंबिता· बिंबितामायाप्रतिबिंबचैतन्यस्यैवजगत्कारणतयासर्वत्रदर्पणेमुखमिवप्रतिफल
नादितितात्पर्यार्थः ॐ ह्रींकारादर्शबिंबितायेनमः ८ ह्रींकारकोशासिलता ह्रींकारएवकोशः तस्यासिलता अतिदीर्घखड्गमित्यर्थः सर्ववैरादिजन्य
दुःखनिवर्तकमसिलतायाइवपरदेवतायापितथात्वेनबहिः प्रकटरत्नायोग्यतासादृश्येनावच्छेदकापेक्षायां ह्रींकारस्यवाचकशब्दत्तयार्थावारकत्वौपम्या
दसिलिकतुल्यतातथाच ह्रींकारकोशविद्यमानासिलतेवदुःखनिवारत्वेसतिभक्ताभयकारित्तिभावः सर्वेषामायुधविशेषाणामसिपदमुपलक्षणं महेन्द्र
यंवज्रमुद्यतंभीषास्माद्वातः पवतइत्यादिश्रुतेः ॐ ह्रींकारकोशासिलतायेनमः ९ ह्रींकारास्थाननर्तकी· ह्रींकारएवआस्थानंसभामंडपः सर्वस्मि
यत्वात्तस्यनर्तकी नीतिसंबंधासंबंधभ्रूसंयोगचरणविन्यासोपलक्षिततालानुसारिहस्ताद्यंगचेष्टानर्तनं तत्कर्त्रीनर्तकी· ह्रींकारवाच्यार्थत्तयामायादि ३९
संबंधासंबंधनिमित्तकविचित्रतरकार्योत्पादनव्यापारानुकारविकार्यविकारिस्वरूपत्तयादृष्टलोकमनोवृत्तिभेदेनतीव्रमंदमंदतरप्रीतिरूपभक्तिविषयतया

भिव्यक्तेनभिव्यक्तेष्टफलसाधनतयास्वस्वकीयपुण्यादितारतम्येनबुद्धिषुधर्मभेदात्प्रतिभातीत्यर्थः ॐ ह्रींकारस्थाननर्तक्येनमः १० ह्रींकारशुक्तिकामुक्ता
मणिः ह्रींकारएवशुक्तिकानीलपृष्टत्रिकोणाकारात्तस्याः मौक्तिकेवमुक्ताफलमियमभिव्यज्यमानाययथास्वातिमहानक्षत्रसर्वदेशेषुमेघसंघात्पतनुज
लबिंदुः शुक्तिकांतः पतितः सामुद्रदेशविशेषेमुक्ताकारेणपरिणमतेतथासत्वरजस्तमोगुणार्थक ह्रींबीजावच्छेदनमनोहरवाचामगोचरसुंदरतरपरदेवता
मुर्त्योसर्वगतमपिचैतन्यविशिष्याभिव्यज्यते तथाच मौक्तिकार्थिनांशुक्त्यापादनवत्परदेवतासाक्षात्कारे नांह्रींकारोपादानमावश्यकमितिभावः ॐ ह्रींका
रशुक्तिकामुक्तामणयेनमः ११ ह्रींकारबोधिता· सिद्धेपदार्थेइंद्रियादिसंबंधेसतिस्वतएवज्ञानोत्पत्तिदर्शनात्रज्ञानेविधिरपेक्षितः क्रियाफलत्वाभावात्
तर्हिनित्यापरोक्षधर्मादिज्ञानवद्ब्रह्मभेदः वेदैकदेशह्रींकारेणैवबोध्यते अज्ञातज्ञापकत्वेनवेदस्यस्वतः प्रामाण्याभ्युपगमात् परंचैतस्यज्ञायमानस्य
परमानंदरूपतयापुरुषार्थरूपत्वात् अतः ह्रींकारेणैवमूलमंत्रात्मनाबोधिताज्ञापिता· हकाररेफईकाराणांव्यस्तत्वदशायांभिन्नभिन्नार्थकानांमेलने: ह्रीं
बीजात्मनापरिणामसच्चिदानंदस्वरूपश्रीमहात्रिपुरसुंदरीतदर्थत्वेनान्वितत्वरूपत्तयाप्रतिभानात् नान्योतोस्तिदृष्टाइदं सर्वमेद्यमात्मा· एकएवतुभू
तात्माभूतेभूतेव्यवस्थितः एकधाबहुधाचैवदृश्यतेजलचंद्रवत् इत्यादिआत्मादृष्टव्यः तद्विजिज्ञासस्वसआत्मानंपश्येदित्यादिषु· लोट्तव्यप्रत्ययानाम

त्रि०भा० हेतार्थकतयानविधित्वमितिसिद्धांतः ॐ ह्रींकारबोधितायैनमः १२ ह्रींकारमयसौवर्णस्तंभविद्रुमपुत्रिका॰ पिंगछपृथ्वीरेणुः सुवर्णमित्युच्यते अ
३९ नुछिद्यमानद्रवत्वस्यनैमितिकत्वेपितेजसांतरप्रदीपप्रभादावदर्शनात्पदार्थांतरसंयोगेरजतादिवदितितेजः संयोगाभासमानभावापत्तेश्चबहीरमणोलहले
स्व्यत्वाभावत्वेनपिपार्थिवत्ववदत्रपार्थिवत्वोत्वाधाभावात् द्रवत्वस्योदकस्वभावत्वेनतत्कार्यपृथिव्यामप्यवलंबोपपत्तेश्चतद्विकारः सौवर्णः सौवर्णश्चा
सौस्तंभश्चनवरत्नमयभारवाहित्वेसतितदभिन्नेसतितदलंकारभूतत्वस्यैवसाधर्म्यस्यह्रींकारेजगदाश्रयत्वेसतितत्कारणत्वेसतितदंतर्भूतित्वेसतिपरमानं
दजनकस्यसत्वेनह्रींकारमयइत्यभेदोपचारः प्रतीपालंकालद्योतनार्थइतिज्ञातव्यंउपमेयह्रींकारेमयशब्देनोपमानाभेदकल्पनात् तस्मिन् विचित्रपिं
गप्रधानरूपेतत्संबंधितयाविद्रुमपुत्रीकेवप्रतीयमाना॰ विद्रुमेनप्रवालेनकृतापुत्रिकासालभंजिकासौवर्णस्तंभशब्दः उपलक्षणंभित्यादीनांप्रायस्त्वद
र्शनात् तदुपादानंस्वतः मनोज्ञस्यस्तंभस्यातिशयदर्शनीयत्तायेदुर्लभतरप्रवालपुत्रिकास्तंभमंडपंतत्स्वामिनंतदेशंचप्रकृष्टीकरोति॰ तथाश्रीपरदे
वतापिस्वेच्छयैतद्विज्ञार्थतयातदवच्छिन्नासतीतदादीनूभूषयतिसकलीकरोतीत्यर्थः ॐ ह्रींकारमयसौवर्णस्तंभविद्रुमपुत्रिकायैनमः १३ ह्रींकार
वेदोपनिषत् वेद्यतेज्ञायंतेसर्वेपदार्थाः अनेनेतिवेदः आत्मायामेकवचनंह्रींकारएववेदः ज्ञापकत्वाविशेषात् तस्यउपनिषत्वेदांतभागः लक्ष्यार्थोवा ३९

तद्ब्रह्मोपनिषत्परमितिश्रुतेः कर्मोपासनाज्ञानविक्रिडभेदेनचत्वारोपिवेदाः त्रिप्रकाराः तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतीतिवाक्येनज्ञानसा
धनतयाकर्मोपासनयोः विनियुक्तत्वात् अंधंतमः प्रविशंतियेऽविद्यामुपासते ततोभूयइवतेतमोयउविद्यायां रताः इतिश्रुत्यातदुभयोः संसारफल
कत्वेननिंदितत्वाच्च आत्मानंचेद्विजानीयादयमस्मीतिपुरुषः किमिच्छन्कस्यकामायशरीरमनुसंज्वरेत् आत्मकामइत्यादिश्रुतिभ्यः अद्वैतज्ञानोत्पादकवेदभा
गस्योपनिषच्छब्दवाच्यस्यमोक्षफलकत्वेनफलप्रतिपादनात्तदुभयप्रतिपादकवेदभागापेक्षयाश्रेष्ठत्वंलोकेसाधनापेक्षयाफलस्येष्टत्वेनोत्तमत्वसिद्धेः तथा
चपूर्वकांडद्वयार्थस्यजन्यतयातत्प्रतिपादकवेदभागस्योपनिषत् शेषत्ववत् ह्रींकारस्यापिपरदेवता॰ प्रकाशकत्वेनतच्छेषत्वात्तस्याः प्राधान्यमुक्तमितिद्रष्ट
व्यं वेदांतेषुपनिषच्छब्दः तज्जनतारूपशक्यसंबंधेनवर्तते मुख्ययावृत्यातुब्रह्मविद्यायामेवतथाहि॰ उपशब्दसमीपदेशार्थकः ब्रह्मण्यध्यस्तमायास
मीपदेशकः तत्पदार्थमतिविंबितमविद्योपाधिकंचैतन्यजीवशब्दवाच्यमुपशब्दार्थः लक्षणयाप्रतिपाद्यतेनिः शब्दात् इतिपदस्यविशेषणंयत्इतिपदं
सदनगत्यवसादनेषुभवति॰ तथाच उपशब्दोवाच्योजीवः अविद्यांनिहत्यस्यत्काब्रह्मस्वरूपेणनिषीदति॰ वर्ततइत्युपनिषत् इत्येकोर्थः जीवः ब्रह्मस्व
स्वरूपेत्वमनिर्गच्छति॰ जनातीत्यन्योर्थः जीवः ब्रह्मस्वरूपेणावसत्तिपरिसमाप्नोतीतितृतीयोर्थः एवमुपनिषत् शब्दस्यब्रह्मविद्यावाचकत्वेनप्रसिद्ध

 स्यतद्वाचकवेदभागत्वेनोक्तत्वेवोपनिषच्छब्दवाच्योभवति तथाच ह्रींकारवेदः तस्यउपनिषत्तत्प्रधानभूताब्रह्मविद्येत्यर्थः ॐ ह्रींकारवेदोपनिषदेनमः १४
 ह्रींकारदक्षिणा ह्रींकारएवाध्वरः यज्ञः तस्यदक्षिणासमाप्तिसाधनं दक्षिणायांदत्तायांयज्ञसमाप्तिदर्शनात् ह्रींकारस्यापिजपः यजमानात्मकतयाऽध्वा
नंरीतिगच्छतीत्यध्वरः मर्यासाधकइत्यर्थः दक्षिणापदंफलवाचिऋत्विग्व्यापाराणांदक्षिणाफलत्वदर्शनात् ह्रींकाराध्वरस्यह्रींकारजपयज्ञस्यदक्षिणा
फलसाधनीभूतपुरुषार्थरूपाऽथवा ह्रींकाराध्वरस्यदक्षिणापत्नीमयस्यदक्षिणापत्नीतिवचनात् ज्ञानयज्ञेनतेमाहमिष्टस्यामितिमेमतिरितिभगवद्वच
नात् ह्रींकारलक्ष्यार्थज्ञानमेवह्रींकाराध्वरः ह्रींकारज्ञानयज्ञः प्रधानंदक्षिणामस्येवइतिवचनात् दक्षिणावत्फलभूतत्वेनप्रधानभूतेतिवा देवतोद्देशनद्र
व्यत्यागोयज्ञइत्युच्यते त्यक्तद्रव्यस्याग्नौप्रक्षेपोहोमः ऋत्विगुद्देशेनवद्यामर्थ्यविभागोदक्षिणाऽर्थिभ्यः वेदिबहिर्देशेऽर्थविभागोदानमित्येषांभेदः ॐ
ह्रींकाराध्वरदक्षिणायैनमः १५ ह्रींकारनंदनारामनवकल्पकवल्लरी नंदनइति आनंदयतीतिनंदनः सचासौआरामश्चतथा देवेंद्रोद्यानंविचित्रस्वरूप
तयाविजातीयार्थकत्वात् ह्रींकारएवनंदनारामः सुखकर्तृविश्रामभूमिः तस्यनवानूतनातिकोमलेत्यर्थः कल्पयतीतिकल्पकाकल्पकत्वासौवल्लीचेति
तथा देवोद्यानेविद्यमानाद्वैनोक्तलतागुल्मतृणादीनामेतल्लोकातिशायिपुष्पकालादिमत्त्वेपिनसर्वोत्तमत्वाप्रसिद्धिः कल्पकवल्ल्यास्तुयथाकर्मयथा

सेवमुपासकानांसर्वार्थप्रधानशक्तिमत्त्वेनसर्वोत्कृष्टता तथाब्रह्मविष्णुरुद्राणांतद्वाचकवर्णभेदानामन्योन्यसंबंधतयेकत्रप्रतीयमानत्वेनचिरंजीविफल
प्रदानेनानंदकृत्तयासंसारतापशामत्वेनच ह्रींकारस्यनंदनोपमा तत्रसर्वार्थप्रदातृत्वेनकामेश्वरालिंगकोमलतरसुंदरमूर्त्याविशिष्टार्थपुरुषार्थचतुष्टयकल्प
नेनसगुणेनिर्गुणोपासकानांतद्देवतात्मनाप्राधान्येनसमष्टिरूपत्वेपयासाहश्येनकल्पकवल्लरीत्युच्यतइतिभावः ॐ ह्रींकारनंदनारामनवकल्पकवल्लर्यैनमः
१६ ह्रींकारहिमवद्गंगा हिमानिसंत्यस्मिन्संतीतिहिमवान्शीतलपर्वतराजः ह्रींकारस्याप्यमृतादिसाधकतयाशीतलताबोध्या तस्मिन्गंगेवपरमपा
वनीसर्वपुरुषार्थप्रदामंत्रदेवतात्मनाभिव्यक्तेत्यर्थः ॐ ह्रींकारहिमवद्गंगायैनमः १७ ह्रींकारार्णवकौस्तुभा कौस्तुभः क्षीराब्धिजन्मसुचतुर्दशरत्नेषु
यथाश्रेष्ठः सर्वाधिकप्रकाशादिगुणित्तया तथापरदेवतापिअपारमहिमापरिच्छिन्न ह्रींकारमंत्रवेद्यत्वेनतत्रिष्वप्यत्रासत्तिअत्रायंपुरुषः स्वयंज्योतिरि
तिश्रुतेः स्वप्रकाशतयाविद्योततइत्यर्थः अत्रकौस्तुभहृदयस्यलक्ष्मीपतित्वसर्वदेवतोत्तमत्वेसत्यादरतमत्वगुणाइवविद्येमाः ह्रींकारार्णवविद्योतमान
ह्रींकारदेवतोपासकस्यापिनारायण्याभेदेनश्रीकांतत्वादिधर्माः स्वतएवसिध्यंतीतिकौस्तुभपदेनध्वनितमितिद्रष्टव्यं ॐ ह्रींकारार्णवकौस्तुभायैनमः १८
ह्रींकारमंत्रसर्वस्वासर्वाणिवित्तानिस्वानिधनानिअनिमाद्यष्टैश्वर्यजनकत्वादीनितानितथा ह्रींकारघटिता ह्रींकारोवातेषांसर्वस्वासकलसंपत्सर्वार्थे

त्रि॰भा॰ साधकशक्तिरित्यर्थः ॐ ह्रींकारमंत्रसर्वस्वायैनमः १९ ह्रींकारपरसौख्यदा॰ ह्रींकारपरा ह्रींकारमंत्रजप२परा: ह्रींकारघटितश्रीविद्याजपपरातेषांसौ
ख्यंचतुर्विधपुरुषार्थप्राप्तिजन्यानंदः तंददातीतितथा ह्रींकाराणांव्यष्टिरूपेणवाच्यार्थानांजगन्मूर्तीनांपरसौख्यंसामरहस्यसुखएकीभावानंदंददा
तीतिचार्थः यत्रनान्यत्पश्यतीतिनान्यच्छृणोतिनान्यद्विजानातिसभूमाथयत्रान्यत्पश्यत्यन्यत् शृणोत्यन्यद्विजानातितदल्पंनाल्पेसुखमस्तीतिआनंदंब्रह्म
णोविद्वान्नबिभेतिकुतश्चनेयदाह्येवैषएतस्मिन्नदृश्येनात्म्येनिरुक्तेनिलयनेभयंप्रतिष्ठांविंदतेअथसोभयंगतोभवति विज्ञानमानंदंब्रह्म रातेर्दातुः
परायणमित्यादिबहुश्रुतिभ्यः अखंडसच्चिदानंदब्रह्मस्वरूपतयासर्वफलंभवति अन्यज्ञानादन्यफलप्राप्तेरयोगात् ब्रह्मवेदब्रह्मैवभवतितरतिशोक
मात्मवित् येनमामुपयांतितितेषामहंसमुद्धर्तामृत्युसंसारसागरात् ब्रह्मैवसन्ब्रह्माप्नोतीत्यादिश्रुतिस्मृतिशतेभ्यः स्वस्वरूपप्राप्तेरेवपुरुषार्थस्यप्रदा
त्वितिसिद्धं ॐ ह्रींकारपरसौख्यदायैनमः २० इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविंदभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवत्पादकृता
यांत्रिशतिनामार्थप्रकाशिकायांतृतीयखंडचतुर्थवर्णनामार्थप्रकाशनंपदंचदशंसमाप्तम् ॥छ॥ ॥छ॥ त्वत्पादवारीभवयुग्ममुपेत्यकर्मेणा
भायदेवमितरंत्वदधीनभूतं दासः श्रयेतवशिवांकवरासनेत्वंतस्मात्कटाक्षकरुणांमयिधेहिमातः १ याचेगिरींद्रतनयेतवपादमूलेबद्धांजलिः स ४१

विनयंबहुधाप्रणम्यत्वय्येवभक्तिभरितंनिवेसन्मनोमेत्वद्रूपमेवसकलंप्रतिभातिविश्वं २ आलोड्यसर्वशास्त्राणिविचार्यचपुनःपुनः त्रिशतीनामयोग्यार्थ
प्रकाशोयमुदाहृतः ३ पश्यध्वंप्रीतिसंपन्नहृदयाविबुधोत्तमाः यदिप्रीतिर्भवान्याश्चचरणांभोरुहद्वये ४ कनन्मंजीराढ्यांकुवलयदलश्यामलवपुः
कुचाभ्यामानम्रांकुरिलकचभारेंदुसकलं मनोजरातिप्राभिमतमगानेकरसिकमहोभिनश्रीदंड-मनसिभवतांब्रह्मकिमपि ५ इति गुणेंदुमुनिभूयुक्ते
शाकेदुर्मतिहायने भाव्यंत्रिशत्यास्वलिखन्मुंडल्योपाह्वोरघुःस्वयम् श्रीपरदेवतार्पितमस्तु॥ श्रीशंभुः शरणंमम श्रीः श्लोक १९००॥छ॥छ॥